सं ते जिह्वया जिह्वां सं त आस्नाह आस्यम् ॥१४॥

२ नमोऽहये असिताय नमस्तिरश्चिराजये ।
स्वजाय बभ्रवे नमो नमो देवजनेभ्यः ॥१५॥

१९.१०

शौ. ६.४१.१ मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥१॥

२ प्राणायापानाय व्यानाय भूरिरेतसे ।
सरस्वत्या उरुव्यचे विधेम हविषा वयम् ॥२॥

---

१३ ख-ग का. सन्तितोकां . . पौरुषाम् । संयतन्वविषातद्वयातन्नस् * *॥
मा. * * * अहिनिधि * सहपूरुषां (= ज$_2$, ना, म)। * * चिस्यरद्
* * * यमत।
ज$_3$. . . . अहिव्धासंतोंकां सहपुरुषां। . .. स यमत्।
ज$_2$. * * अहिर्वधी स(तो→)न्तोकां . .। ख शौ. सतौकान् *।
क म. . . वंधी; घ ज$_2$. व्यात्तन्न * * ॥
१४ का. सन् * ददामि . . र्यतस्यते * *। सन् * * जिह्वा सन् त्वास्नाहस्यम्।
मा. स . . र्हितः स . . । . . . सन्त * *॥ उ. सन्ते इति सर्वत्र। क
म. शं . . .;
क-ग ज$_3$. . . . . दद्भिहिस * * * । * * तित्क *;
१५ कख का. * हर्ये . . . श्चराजे। क उ. * * षिताय;
घ का. 'नमो' इति नास्ति।
१९.१०.१ कख का. सा. अ.। ख ज$_3$. आजूतय उत्त (→त) *। मा. * उत्त *।
ग मा. मयै श्रीताय *; ज$_3$. मयै * *;
२ का. मन्त्रो नास्ति। क शौ. अपानाय व्यानाय; छन्दःसम्पत् साधीयसी।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ मा नो हासिषुर्ऋषयो* दैव्यासस्तनूपावानः शुचय-
स्तपोजाः+ ।
ख तु.ऐ.ब्रा. २.२७.(४) अमर्त्या मर्त्याँ अभि नः सचध्वमायुर्नः प्रतरं जीवसे
धुः ॥३॥

५७.१ इदमिद् वा उ भेषजमिदं रुद्रस्य भेजजम् ।
येनेषुमेकतेजनां शतशल्यामपब्रुवन्+ ॥४॥

२ जालाषेणाभि षिञ्चत जालाषेणोप सिञ्चत ।
जालाषं भद्रं भेषजं तस्य नो धत्त जीवसे ॥५॥

३ शं च नो मयश्च नो मा च नः किं चनाममत् ।
क्षमा रपो विश्वं नो अस्तु भेषजम् ॥६॥

५८.१ यशसं मेन्द्रो मघवान् कृणोतु यशसं सोमो वरुणो वायुरग्निः।
यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणायाः*
स्यामहम् ॥७॥

---

३ का. * * * ऋषायो . . . जात् . . . सवध्वंवायुंन्नष् प्रतिरं * *;
क मा. मनो . . .; उ. * * हाशिषुऋषयो ;
ख उ. . . . स्तपोयाः । ज$_{२}$, म. . . स्तनुपा . . .;
द्र. * * * ऋषयः ॥ दैव्याः। ये। तनूऽपाः॥ ये। नः। तन्वः। तनूऽजाः। इति
शौ. प. पा. पादविभागः।
घ उ. . . . प्रतरन् * * ॥ ॥
४ गघ का. येनेकु . . मुपधुबन्।
क मा. . . . मद्वा * . . . ; घ उ . . ब्रु(ज$_{२}$. ब्र)वं ।
५ कख का. सा. अ.। ज$_{३}$. . .. सिंचत।
गघ का. जालाषे * * . . . देहि * । ग मा. * भद्र *;
६ कख का. सा. अ.। गघ का. . . . क्षामाधमो विश्वन्नोस्तु *;
कख मा. शञ्च * . . . किञ्च . . .।
ग मा, ज$_{३}$. क्षम्या * * * ऽस्तु * । ज$_{२}$. . . ऽ → अस्तु।
७ क मा. . . . मघवा * ; का. * मे इन्द्रो मघवा * ;
घ का. प्रिप्रियो . . . मा, * दातु . . .; का, उ. . . दक्षिणाया . . .॥
द्र. ज$_{३}$. 'प्रियो दातु' -इति द्विः पठितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ यथेन्द्रो द्यावापृथिव्योर्यशस्वान् यथाप ओषधीषु ।
यथा विश्वेषु देवेष्वेवा देवेषु यशसः स्याम ॥८॥

३९.२ अच्छ$^{+}$ वयमिन्द्रं यशसं यशोभिर्यशस्विनो हविषैना विधेम।
तु. पै. १९.८.९ स नो दधद्राष्ट्रमिन्द्रजूतं तस्य त्रात्रे अधिवाके स्याम ॥९॥

शौ. ७३.१ एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु ।
अस्य श्रियमभिसंयात सर्व उग्रस्य चेतसः संमनसः
सजाताः ॥१०॥

३ एह यात माप याताध्यस्मत् पूषा वः पुरस्तादपथं कृणोतु।
वास्तोष्पतिरनु वोयमह्वन्$^{+}$ मयि सजाता रमतिर्वो
अस्तु ॥११॥

---

८ क का. . . . पृथिवीयश . . .; ज$_{२}$. . . . व्योर्य → यश . . .।
ख का, मा. . . . उषधीषु । ज$_{३}$. . . . एषधीषु । शौ. यर्शस्वतीः
ज$_{२}$. . . . उ → ओषधीषु ।
घ का. . . . यशस स्यामः; ज$_{३}$. . . . साम।
९ कख का. अश्छ . . . षैनां *। ज$_{२}$. अत्स . . .;
ख ज$_{३}$. . . . हविषेना * । ग मा,ज. . . . युतं ;
घ का. रात्रे * * । मा. * त्राते * * ॥ ॥
१० का. . * ग्नि . . . । यस्य श्रीमभिसयात्व * स्रुग्रस्य * समनस्सुजाता ।
कख मा, ज$_{३}$. . . अग्निवृह . . . ; उ. * यात (जात. ज$_{३}$) . . . यात।
ग मा. * . . . सं जायत * ; म. अ(→ त)स्य . . . ;
ज$_{२}$, म. * . . . संजात, ज$_{३}$. * संजातस्य * ;
घ उ. * चेतः * * ॥
११ घ का. * यात्व * यथाध्य . . परस्ताद . .। वास्त्वष्पतिरनमोयभह्वं *
स्रुजा * * स्त्व।
शौ. . . वो जोहवीतु ;
क मा. * जात. . . ;
ग मा, ज$_{३}$. वास्तोष्वति . . . ; ज$_{२}$,म, ना. . . . मह्यं ;
घ ज$_{३}$. . . . रमितिर्वो * ॥ मा, ज$_{३}$. . . मह्वं ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ यो वः शुष्मो हृदयेष्वन्तर्याकूतिर्मनसि प्रविष्टा ।
तां छ्रेवयामि हविषा घृतेन मयि सजाता रमतिर्वो
अस्तु ॥१२॥

× मम चित्तं प्रयवमन्वि*तेहेन्द्राग्न्योरिव हवमेत सर्वे ।
बृहस्पतिर्वो नि युनक्तु मह्यं मम वाचमेकचित्ताः
सचध्वम् ॥१३॥

९४.२ अहं गृह्णामि मनसा मनांसि मम चित्तमुप चित्तेभिरेत।
मम वशे हृदयं वः कृणोमि मम यातमनुवर्त्मान
एत ॥१४॥

मां वश्चक्षुर्गच्छतु† मां प्राणो धाता पदमनुवर्त्म वः कृणोतु।
ये वो महान्त उत ये कुमारा मम यातमनुयाते-
भिरेत ॥१५॥

---

१२ का. * * शुभो . . . ष्वतर्याभूतिर्म . . * । तं श्रेव . . * * * सुजाता रमर्तिर्वोस्तु । मा. नास्त्ययं मन्त्रः ।
क ज$_3$. . . . हृदयेऽष्वन्त-;
कख उ. न्तर्य(म. य)आकु (ज$_3$. जू)ति . . .। शौ. तान् छ्रींवयामि..,
गघ ज$_3$. तानच्छेव . . . मइ * . . . ॥ म. तान्छ्रेव . .;
१३ का. सम . . प्रेवमन्यते एन्द्राग्नयो . . . मेतु * । वृहस्पते . . . क्त . . . चित्तस्सवध्वम् ;
क उ. * चित्तः (ज$_3$. चित्त) . . मन्युते . . ; मा, ना. . मन्युरेहे . .;
ख मा, ज$_3$. . . मेतु * । गघ मा. वृहतिर्वो . . . चित्ता * ॥
१४ ख-घ का. मच . . . रेतः . . .कृणोतु * वाचममृतमानयेत्।
खग ज$_3$. . . भिरेत् । * * हृदयम्ववः * ;
घ मा, ज$_3$, म. . वत्मान * (येत मा.)। ज$_2$. . वर्त्मा(→त्मा)न * ।
१५ का. . . . वाँ * * . . . नुव्रतमिवष् * । य * महन्तु * * * सम . . . नुवातेभिरेतः z२z
क मा. * वः श्च . . .; ज$_3$. * वः चक्षुर्गछन्तु ;
ग ज$_2$. * वो → नो * . . .;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९.११

पै. ७.१०.६ अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
शौ. ५.४.३ तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत ॥१॥
६.९५.१ प्रती.
शौ. ५.४.७ देवेभ्यो अधि जातोसि सोमस्य सखा हितः ।
स प्राणायापानाय चक्षुषेऽस्य मृड़ ॥२॥

६.६३.३ कख अयस्मये द्रुपदे *बेधिषे यदभिहितो मृत्युभिर्ये सहस्रम्।
२ गघ यमो मह्यं पुनरित्* त्वां ददाति तस्मै देवाय हविषा विधेम ॥३॥
१ यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ।
तत् ते वि ष्याम्यायुषे बलायानमीवं पितुमद्धि प्रसूतः ॥४॥

१९.११.१ का. * देवसवन इत्यजातांते । उ. . . सदन इत्यजायतान्ते ।
२ ख का. . . . यतः ; शौ. सोमस्यासि * *।
क $ज_{३}$. * ऽधि . . .; ग मा. * प्राणाय . . .; म. . . नय;
घ $ज_{३}$, म. ऽ नास्ति। $ज_{३}$. चक्षुसेस्य * ॥ शौ. * मे अस्मै *॥
३ क-ग का. अयस्यय * वेदिषेदभीतो . . . रत्वां ददात्व;
क मा. * * वेधिस . . .; $ज_{३}$. * द्रूपदे * ; .
कख उ. . . . यदवि . . .। $ज_{३}$. . . . विह्वतो . . .।
म. . . . षेधियदविहितो . . .।
ग उ. * * पुनरुत्वां *;
द्र. का. ३[ग] – ५ सस्वरः पाठः ।
४ का . . ग्रीवासुविचृत्यम् । . . . ख्याम्याययेबंलायानमिवं . . . मध्ये *;
क मा. . ववन्धं ; कख $ज_{३}$. . निऋति . . विचर्त्य ।
गघ मा. . श्वामायुषे . . पितृमर्द्ध * ॥ $ज_{३}$. . ष्यास्यायुषे . . ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा. स. १२.६३, तै.४.२.५.३

२[कख] नमस्तु ते निर्ऋते विश्ववारे अयस्मयं वि चृता बन्धमेतम्।
३[गघ] यमेन त्वं पितृभिः संविदानोत्तमे नाके अधि
रोहयेमम् ॥५॥

३२.१ अन्तर्दावाय जुहुता* स्वेतद् यातुधानक्षयणं घृतेन ।
आराद्रक्षांसि प्रति दहाग्ने मास्माकं तन्वमुप
तीतपन्त ॥६॥

२ शर्वो वो ग्रीवा अशरीत् पिशाचाः पृष्टीर्वोपि शृणात्वग्निः।
वीरुद् वो[+] विश्वधावीर्या मृत्युना [+]समजीगमत् ॥७॥

४०.३ अपिशाचं नो अधरादपिशाचं न उत्तरात् ।
इन्द्रापिशाचं नः पश्चादपिशाचं पुरस्कृधि ॥८॥

---

५ का. . निर्ऋविश्वावारे .. स्मयान् प्र मुमुग्धि पाशान् । . . अधी . . येनम् ; गघ पाठो यजुर्वेदीयेन समानः। क यर्जुर्वेदे नमः सु *, शौ. नमौस्तु *; द्र. नमस्तुते? $ज_३$. . . . निऋते . . . वद्धमेतं । . . . विद्यानो . . . ॥

६ का. * जुषस्वेनद्यातुधानष्क्षेणं घृतन्नः . . द्राज्ञांसि * राह्यग्ने . . . कंन्वमुप तीतिपन्था । क उ. * जुहुदा *; घोषवर्णसान्निध्यात् त → द। $ज_३$. . ददाग्ने . . . तन्यमुप * ।

घ म. मायुस्माकं . . . तीतीतपन्तु । $ज_२$, म, ना. . . . तीतपन्तु ॥

७ का. * * द्ग्रीवायशरीष्पिशाचा . . पशृणात्यग्निः * भ्यो. . जिगमत्।

ख उ. पृष्टि (← ष्टी $ज_२$) र्वो . . . ।

ग $ज_३$. . . . वर्या ;

गघ उ. विरुद्धो (← न्द्वो $ज_२$) . . . गमन् (गमं ॥ म)॥

८ क का. अपिशाचन्नो अदरा - ; मा, $ज_३$, ना, . अपिशाच . . ; द्र. खग पादौ का. न स्तः । . . . . अनुस्वारस्य परसवर्णः ।

घ $ज_३$. . . . दपिचं * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६५.३कख इन्द्रश्चकार प्रथमो नैर्हस्तमसुरेभ्यः ।
२गघ वृश्चामः शत्रूणां बाहू अनेन हविषा वयम् ॥९॥

६६.१ निर्हस्तः+ शत्रुरभिदासन्नो अस्तु ये सेनाभिर्युधमायन्त्य-
स्मान् ।
समर्पयेन्द्र महता वधेन द्रात्वेषामघहारो विविद्धः ॥१०॥

६५.१ अव मन्युरवायता अव बाहू मनोयुजा ।
पराशर त्वं तेषां पराञ्चं शुष्ममर्दयार्वाचीं रयिमा
कृधि ॥११॥

६६.२ आतन्वाना +आयच्छन्तोस्यन्तो ये च धावथ* ।
निर्हस्ताः शत्रव स्तेन्द्रो वोद्य पराशरीत् ॥१२॥

---

९ ख उ. नैरुहस्त . . . ।
ग का. वृश्चामि * * ; मा. . . . वाहुं (→ हु); ज३. दृश्छामः-;
१० का. निरह . . . शन्नोस्त्वेषैनाभिरिध्मायंन्त्यस्मान् . . . मघारो *;
ज३. निरुहस्तः . . . न्नो ऽस्तुर्ये . . . मात्यन्त्वस्मान् । समर्थये . . .
मपहारो विविधः ॥
क मा. निर्ऋहस्तः . . . ; ज, म, ना. निरुहस्तः . . . ;
घ उ. . . . विविधः ॥
११ का. * मभ्यु .. ताव * * । * त्तुत्वेषांप्राञ्चं . . मन्दया। अर्वाञ्चं . .।
ख-घ ज३. . . . सनोयुजा । . . . पराञ्च . . रई . . . ॥
गघ मा. परासर * * पराञ्च . . रयी → ईमा * ॥
द्र. कख ८. . अवायतै अव . . ? शौ . . रवायतावं . . .। ग. तेषां
इत्यतः ज३. 'इन्द्रश्चकार . . . अने' इति निवेशितम् । अत्र 'वृश्च्यामः'
इति पाठः ।
१२ का. * यश्छन्दोयस्यन्तोवे * धावतःनिर्हस्तश् * स्त्वेन्द्रो . . शरी।
ख उ. . . * व धावत (ज३, म. -त्)।
गघ मा. निरुहस्ताः . . । परासरीत् । म. निरहस्ताः . . .॥ शौ. . .
स्थनेन्द्रो . . .॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६६.३ निर्हस्ताः सन्तु शत्रवोऽङ्गैषां म्लापयामसि ।
यथैषामिन्द्र वेदांसि यूथेषु[+] विभजामहै ॥१३॥

६५.२[कख] निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ ।
३[गघ] जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना ॥१४॥

१९.१२

शौ.६.११.१[कखघ] शमीमश्वत्थ आरूढस्तत्र पुंसवनं कृतम् ।
ग× तदेव तस्य भेषजं य(:) स्त्रीष्वा हरन्ति तम् ॥१॥

२ पुंसि वै रेतो भवति तत् स्त्रियामनु षिच्यते ।
तद् वै पुत्रस्य वेदनं तत् प्रजापतिरब्रवीत् ॥२॥

---

१३ का. . . . प्लापयामसि । अथै (= शौ.) . . . यूथसो * भजावहि ।
ज$_{३}$. * श(→ स. ज$_{२}$)न्त्व * . . . । वेद्यांसि युथेसु विभवजामहै ॥
ख मा. ऽङ्गैसा * । ज$_{२}$, ना. ऽङ्गैषा * । म. ङ्गैषा * ।
ग म. वेढाऽसि ? घ. मा. . . . युथेषु * । ज$_{२}$, म, ना. यूथेसु * ।
१४ का. . . . यन् . . . स्यतः . . . मेदिनीम् zz ३ zz
क मा, ज$_{३}$. निरुहस्तेभ्यो नैरुहस्तं (= ज$_{२}$, ना.)
ग मा, ज, ना. * सत्वालो * ;
काण्डिकान्ते ज$_{२}$ ॥ ११ । ऋ १५ ।
१९.१२.१ कख का. . . स्त * * ।
क मा. समामस्वत्थ . . . ; मा, ज. . . . आरुढ . . . ;
घ का. यत् * * *। उ. * * आ * (मा. हरन्ती) तं। म.यस्त्रीष्ट्वा . .
.। शौ. तत् भरामसि। द्र. पाठः संशयितः। उ. आ < आः?
२ क का. * वी * * ; मा. . . भव ;
ख उ. तस्त्रि . . .। ज$_{२}$. तस्त्रिआ . . . । ग ज$_{३}$. . . वेदन ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ प्रजापतिरन्वमंस्त सिनीवाल्यचीक्लृपत् ।
+स्त्रैषूयमन्यत्र दधत् पुमांसमुत् दधदिह ॥३॥

पै. ११.७.५ या ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
ऋ १०.९७.१८कख १५गघ
शौ. ६.९६.१ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥४॥

२ तु. पै. ३.१७. मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
४ ऋ १६
अथो यमस्य पड्वीशाद् विश्वस्माद् देवदुष्कृतात् ॥५॥

३ यच्चक्षुषा यन्मनसा यच्च वाचोपारिम यज्जाग्रतो यत् स्वपन्तः ।
सोमो *मा तस्मादेनसः स्वधया पुनातु विद्वान् ॥६॥

---

३ का. . . . मँस्व . . . दीक्लिपत् । त्रिषूय . . दध . . . दधीया।
क मा, ज३. . . . रन्य . . . ;
ख उ. शिनी . . .। मा. . . . चीक्लुपत् । ज२. . . चीक्लृ → क्लुपत्।
ज३. . . . चकृपत् ।
ग मा. स्तूयाषूय . . .; ज, म, ना. स्त्रयीषूय . . .; ज३. . . . मन्वत्र *;
घ शौ. . . समु * ॥ शां. गृ. १.१९.८. स्त्रीषु . . समा दधादिह। द्र. पै.
पाठः शोधनीयः।
४ का, उ. * * . . राज्ञीरित्येका । पाठः ११.७.५ मन्त्राद् गृहीतः। क
ऋ. * ओषधीः॥
५ ख का. सा. अ.। गघ का. * * पड्विषा सर्वस्माद्देवकिल्बिषात् z = . .
. ३.१७.४घ
ख ज३. . वरुन्यादुत। ग मा, ज३, ना. * * पड्विषाद्वि . . ;
६ का. यश्चक्षुषा . . . यश्च . . . पुनाति * ;
क ज३. . . . यन्मसा ; ख मा. यज्ञा . . . ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९७.१ अभिभूर्यज्ञो अभिभूरग्निरस्त्वभिभूः सोमो अभिभूरिन्द्रो
अस्तु ।
अभ्ययं विश्वाः पृतना यथासदेवा विधेमाग्निहोत्रा इदं
हविः ॥७॥

२क-ग स्वधास्तु मित्रावरुणा प्रजावत् क्षत्रं मध्वेह पिन्वतम् ।
ऋ १.२४.९ग बाधेथां द्वेषो निर्ऋतिं पराचैरस्मै क्षत्रं वर्च आ
धत्तमोजः ॥८॥

शौ.६.९७.३,
१९.१३.६ इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सत्वानो अनु सं रभध्वम्।
पै. ७.४.६ ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्त-
ऋ १०.१०३.६ द्र. मोजसा ॥९॥

शौ. ६.२०.१ अग्नेरिव †प्रसितिरस्य शुष्मिण उतेव मत्तो विलपन्नपायति†।
तस्मै ते अरुणाय बभ्रवे तपुर्मघाय नमोऽस्तु
तक्मने ॥१०॥

---

७ का. अभी . . ज्ञोभि . . रस्तुअभीभूस् * भि . . न्द्रोस्तु । अद्यय . . सिदेवा . . ;
क मा. . यज्ञो . . ; ज$_{२}$. . अभिभु . . ; ज$_{३}$. अहि . . ;
ग मा. अभयं विशाः * . . . ; घ ज$_{३}$. . . ग्निहोरात्रा * * ॥
८ का. . . स्थ * प्रजापतिष् * मध्येहि . . त्वेषो . . वर्चा * ;
क ज. . . . मित्रावरुणां * ; मा, ज. . . . प्रजावत; म. . . . प्रजापत्;
ग मा, ज$_{३}$. . . . निर्ऋतिं ;
९ का, उ इमं वीरमित्येका॥
१० का. अग्नि . . . प्रसृजस्य * वितेव * विलपंन्वपायति * * * * तपुनर्म . . . तन्मने ।
"...रिवास्य दहन्त एति ...।अन्यमस्मदिच्छतु कं चिदव्रतस्तपुर्वधाय * * *।" इति शौ. पाठो भूयोऽन्यः।
क-ग उ. . . . प्रशिति . . . मर्त्तो विलपंनयायति । * * रणाय * ;
घ मा. . (ऽ →) अस्तु * ॥ ज$_{३}$. . र्मशाय . . ॥ म. . अस्तु * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ नमो यमाय नमोऽस्तु मृत्यवे नमो राज्ञे वरुणाय त्विषीमते।
नमः क्षेत्रस्य पतये नमो दिवे नमः पृथिव्यै नम
ओषधीभ्यः ॥११॥

५.२२.२ अयं यो जनान् हरितान् कृणोत्युच्छोचयन्नग्निनेवाभिदुन्वन्।
अधा हि तक्मन्नरसो हि भूया अथान्वङ् अधराङ् वा
परेहि ॥१२॥

६.९८.१ इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै।
चर्कृत्य ईड्यः+ संस्य(<*शंस्य)श्चोपसद्यो नमस्यो
भवेह ॥१३॥

२ त्वमिन्द्राधिराजः* श्रवस्युस्त्वं भवाभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरन्ते
अस्तु ॥१४॥

---

११ घ का. नमो . . .; क मा, म. * * . . अस्तु * ;
१२ का. * * जनां हरितां . . श्छोचयंरग्निमेवाभिध(→ तिधु)न्वम् * *
तक्मंजरसो * * धन्यान्वधरान् * . . . ; शौ. * * विश्वान् * . . .
अधा न्यङ्ङधराङ् * *॥
घ मा, ना, ज. अथान्वं . . ॥ मा. . अधरान्त्वा (ना . . त्वा) * ॥ $ज_3$.
. अधराङ्वा * ॥
१३ कख का. सा. अ.।
गघ का. चरकृङ्ङी (?) ड्य संसश्चो . . मुम्ब . चरकृड्डी(?). . ।
मा. चकृत्य इद्यः संस्योप . . . ॥
उ. * इद्यः . . . ; ज, म, ना. . . संस्यश्वोप . . .॥
द्र. १३गघ शौ. . . . वन्द्यश्चोपसद्यौ . . . इति पाठात् पै.
*शंस्यश्चोपसद्यो इति पाठः समीचीनः इति प्रतीयते।
१४ का. . . . राज स्रवस्रस्त्वंष्मत क्षत्र . . . . स्तु ।
द्र. का ख-घ 'भवा . . . यु' इति पतितम् ।
क उ. . . . धिराज . . .; $ज_3$. . . . श्रवस्तु . . .;
घ $ज_2$. – युष्म (+ त) त् . . . ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ प्राच्यां दिशि त्वमिन्द्राधि राजोदीच्यां वृत्रहन् दस्युहासि।
यत्र यन्ति *स्रोत्यास्तज्जितन्ते दक्षिणतो वृषभोसि
हव्यः ॥१५॥

॥ इत्येकोनविंशे तृचकाण्डे तृतीयोऽनुवाकः ॥

१९.१३

शौ. ६.९९.१ अभि त्वेन्द्र *वरिमतः पुरा त्वांहूरणेभ्यः ।
ह्वयाम्युग्रं चेत्तारं पुरुणामानमेकजम् ॥१॥

२ यो अद्य सेन्यो वधो जिघांसन्* न उदीरते ।
इन्द्रस्य तत्र बाहू समन्तं परि दध्महे ॥२॥

---

१५ का. प्राच्यान् * . . . धिरा न्ते * . . . z
द्र. का. खग 'जोदी . . . त' इति पतितम् ।
ख $ज_३$ – दीच्या . . . । खग उ. . . . वृत्रहं . . . । * * श्रोत्या . .;
ग मा. * * श्रोत्यास्तय्जितन्ते ; $ज_३$. . . . ज्मितं ते ;
कख, घ औ. पाठः अन्यः।
काण्डिकान्ते का. अनु ३z इत्येकोनविंशतिकाण्डे तृतीयोनुवाकस्समाप्तःzz म. ॥१२॥ऋ ५०॥इति त्र्यृचकाण्डे तृतीयोऽनुवाकः॥१२॥ ॥ मा. तृतीयोनुवाकः॥ ॥ ना. (१९.१२) (ऋ. १५) (इत्यृचकाण्डे.....)।
द्र. छन्दसि "तृच"इत्येव वार्तिक-भाष्यसंम्मतम्। पा. ६.१.३७, वा. ५द्र.।

१९.१३.१ क का. . वरमितष् . . ; उ. . . व(म. प)रिमितः ; ख उ. * त्वांह्व . .॥
गघ का. ह्वया . . . नकजाम् ; मा, ना. उह्वी याम्यु . . . ; $ज_२$. उह्वा (ह्या ?) याम्यु . . .॥ म. उह्वयाम्यु . . . ।
द्र. क वरिमतः = शौ.। का. वरमित इति वर्णविपर्ययः (metathesis), उ. वरिमित इत्युत्तरव्यञ्जने समानस्वरादेशः (रिम → रिमि)। पाठविक्रियायाः स्पष्टत्वात् शोधो निर्बाधः। ग उद्ह्वयाम्यु ग्रमित्यर्थवहोपि शौनकीयेन समानः का. पाठो गृहीतः। तेन छन्दः सुकरः।

२ का. * द्य दैव्यो * जिघाँसं * मुदीरते । . . . * * ध्महे ।
क मा. * * सैन्यो *; ज. * ऽद्य * * ;
ख उ. जिघांस * * । ग मा, $ज_३$, ना . . . वाहु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ परि दध्म इन्द्रस्य बाहू समन्तं त्रातुस्त्रायतां नः ।
देव सवितः सोम राजन् सुमनसं मा कृणुतं स्वस्तये ॥३॥

१००.१ देवा अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यदात् ।
सर्वाः सरस्वतीरदुः सचित्ता विषदूषणम् ॥४॥

२ यद् वो देवा उपजीका आसिञ्चन् धन्वन्युदकम् ।
तेन देवप्रसूता इदं दूषयता विषम् ॥५॥

३ असुराणामसि दुहिता देवानामसि स्वसा ।
दिवस्पृथिव्या जज्ञिषे सा चकर्थारसं विषम् ॥६॥

---

३ का. * दध्मानिन्द्रस्य . . . त्रातुं स्तायताह्नः * सवितुस् * * सोमनसं * * * ।

द्र. पत्रस्याधः का. "बाहूसमन्तंत्रातुंस्त्रायताह्नः; जीर्णार्थे"; <जीर्णार्धे, पत्रस्य जीर्णे भागे? द्र. २गघ - ६ इतस्ततः सस्वरा मन्त्राः।

क मा. . . . . वाहु समन्तं . . . । ना. * * इन्द्रवाहु;

ख ज$_३$. * त्रातुस्रातुस्त्रायतांन्नः । ज$_२$, मा. . . . यतान्नः ।

४ का. * दुस् * दाद्यौरदान् . . . सर्वा . . . रज्ञस् * * ।

क उ. . . . अदा ;

ख मा. द्यौरदा . . . । ज$_३$. द्वौरदात्पृथिर्व्यदात् ।

ग मा, ज$_३$. सर्वा . . . ;

५ का. * * * उषचीकासिञ्वं धन्वंनुदकं * . . . सूता । * * विषत् ।

ख ज$_३$. . . . धन्वंन्यु . . . । म. आसिञ्वं . . . ।

घ उ. * दूषय यद्विषं ॥

६ क ज$_३$. . . . दुहित्रा ; ग उ. . . . यज्ञि (ज्ञ मा) षे;

घ का. * जिगर्था . . । मा. . * चकर्ता . .॥ ज$_३$ षा . .।

मन्त्रान्ते ज$_२$ ॥ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१४.१ अस्थिस्रंसं परुस्रंसमास्थितं हृदयामयम् ।
बलासं सर्वं निष्कृध्यङ्गेष्ठा यश्च पर्वसु ॥७॥

२ निर्बलासं बलासिनः क्षिणोमि पुष्करं यथा ।
छिनद्म्यस्य बन्धनं मूलमुर्वार्वो यथा ॥८॥

३ निर्बलासेतः प्र पत सुपर्णो वसतेरिव ।
अधेट इव हायनोऽप द्राह्यवीरहा ॥९॥

१०१.१ आ बृषायस्व* श्वसिहि* वर्धस्व प्रथयस्व च ।
यथाङ्गं वर्धतां ते शेपस्तेन योषितमुज्जहि ॥१०॥

---

७ का. * परिस्रंस . . दं . . . बला * निष्कृड्यंगेष्ठा . . *।
कख मा. अस्थिस्तंसं परुस्तंस . . . ।
क ज$_{३}$. . स्रसं . . . ; म. अस्थिश्रंसं . . .; ज$_{२}$ म. . परुश्रंस-;
गघ मा, ज. . . . ध्यङ्गेष्वा . . . ॥
८ का. . . . . सिन कृणोमि * * छिन्नाद्यस्य * मूलमुल्वार्वो * ।
क ज$_{३}$. निवलासं * ;
घ मा, ना. मूलमूर्वार्वो * ॥ ज$_{३}$. मुलमुर्वार्वो * ॥ ज$_{२}$, म. मुलमूर्वार्वो (र्वौ ला.) * ॥ घ शौ . . . मुष्करं(सा. पुष्करं)। . . . मुर्वार्वा इव॥
९ का. . . . . सेट प्रपतस् . . . रिव z अध z इवाहनोप द्राह्यवैरह;
क ज$_{२}$, म. निर्वलाशे (← से ज$_{२}$) तः . . ; मा, ज$_{३}$. . * पतः ;
गघ मा. अधेटे * * * द्राह्ववीरुहाः । ग ज$_{३}$. . . . ईव * ;
द्र. ज$_{२}$, मा. म. ऽ नास्ति ।
१० का. मा वृषायस्य स्वसीधस्यप्रथयस्य * . . . मजहि ।
मा. आः . . . । . . . वर्धता त्रे . . . मज्महि ॥
ख ज$_{३}$. - वर्धयस्व प्रथयस्य * । ज$_{२}$. प्रथयस्व → स्य ;
द्र उ. सर्वत्र 'वृषायस्य,' 'स्वसिहि,' 'प्रथयस्य' (स्व ला.) ।
घ ज$_{३}$. * योक्षित्रमज्महि ॥ म. . मञ्झहि (= ला.)॥ शौ. . मिञ्झहि॥ पै पाठोपि युज्येत।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ येना कृशं मेदयन्ति येन हिन्वन्त्यातुरम् ।
तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः ॥११॥

३ आहं तनोमि ते पसो अधि ज्यामिव धन्वनि ।
३४.४.७ क्रमस्व रिश्य इव रोहितमनवग्लायता त्वम् ॥१२॥

२७.१ देवाः कपोत इषितो यदिच्छन्[1] दूतो निर्ऋत्या इदमाजगाम।
ऋ. १०.१६५.१ तस्मा अर्चाम कृणवाम निष्कृतिं शन्नो अस्तु द्विपदे शं चतुष्पदे ॥१३॥

२ शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहे नः।
ऋ २ अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥१४॥

---

११ कख का. * कृषि मेदयन्ते * हिन्वंभ्यात्वरां ;
ज$_3$. * दृश्यं * चयनिहिन्वंन्त्यात्वरं । . . स्यतेप्र . . तनया . . ।
ख मा. * हिन्वंन्त्यात्वरं । ज$_2$ * हिन्वंत्यात्वरं ।
१२ कख का. अहं * * * धि . . . । क्रमस्यरश्वैव . . ग्लायदा * ।
क उ. . . . पशो; ग ज$_3$. * रिश्व * . . . ;
घ मा. . . ग्रा → ग्लायता * ॥ ज$_3$. . . . ग्रायता * ॥
ज$_2$ . . . . ग्रायतां * ॥ म ग्लायतां * ॥
गघ शौ. क्रमर्स्वर्श इव . . . सदां; सा., कण्ठपाठः--
क्रमस्व ऋष०इव रोहितमनु वल्गूयता . . .; गि. क्रमं। स्वर्ष०इव। . . .; पै <ऋश्य इव। अपि तु द्र. रिश्यपदीं शौ.१.१८.४, पै. २०.१९.७, सा . , कण्ठपाठः - ऋश्यपदीं।
१३ क-ग का. देवष् * * यदिश्छंद्रतो . . .। तस्म * निष्कृतिं (→ष्कृतं);
घ का. 'शं' नास्ति ।
क मा. * * ईशितोयदित्सं ; ख मा, ज$_3$. * निऋत्या . . .।
गघ मा. * र्चाम . . . सं * ॥
ज. . . शनो * . . . ॥ द्र. का. १३-१४ख मन्त्राः अङ्कितस्वराः।
१४ का. . . . नाशा . . . गृहेषु (= ऋ.!)। . . . हविन्नः . . . वो *;
कख ज$_3$. . . नो स्त्वानागा * . . . । ऋ. . गृहेर्षु । शौ. . गृहं नं। ग मा, ज. अग्निरिहि *;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ ऋ ३ हेतिः पक्षिणी न दभात्यस्मानाष्ट्री पदं कृणुते अग्निधाने।
शन्नो गोभ्य उत पुरुषेभ्यो मा नो देवा इह हिंसीत्
कपोतः ॥१५॥

२८.१ इषं मदन्तः परि गां नयामः संयोपयन्तो दुरिता पदानि।
ऋ ५ ऋचा कपोतं नुदत प्रणोदं हित्वा न ऊर्जं प्र पतात्
पतिष्ठः ॥१६॥

× नुदे त्वा प्र णुदे त्वा कपोत रक्षसा सह ।
यतो न पुनरायसि तत्र त्वा गममयामसि ॥१७॥

१९.१४

शौ.६.१०२.१ यथायं वाहो अश्विना समैति सं च वर्त्तते ।
एवा मामभि ते मनः समैतु सं च वर्तताम् ॥१॥

२ आहं खिदामि ते मनो राजाश्वः+ +पृष्ट्यामिव ।
रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टतां मनः ॥२॥

---

१५ का. . . . . दभात्वस्मादा(→ न्ना)ष्ट्री * कृणुषे *। * भ्य * पारुषेभ्यो
* देवाहिंसीत् *;
मा. हेति पः क्षिणी * दभायत्यस्मानाष्टी . . .। शंनो . . . हिशित् *॥
ग $ज_३$. . . . गाभ्य * * ;
१६ का. . . . गान्नयामिशं . . . रुचा * नुदत्व प्रमोदं * मूर्जं * * * ;
क $ज_२$. . . . नयाम (+ न): ;
ग मा, $ज_२$. * * नुदतः *; घ उ. . . . पथिष्ठः ॥
गघ $ज_३$. . . . प्रमोदं * * उर्ज ॥ * पता पथिष्ठः ॥ शौ. ख, घ
संलोभर्यन्तो * *।, ... पदात् पथिष्ठः ॥
१७ का. . . . मसि z१z
१९.१४.१ का. सा. अ.। द्र. बाहो इति का, क्वचित् शौ.।
ख मा. समेत . . .। $ज_३$. समेति . . .। घ मा. * संवर्त्तते।
२ का. अहं माकिखिदामि * * राजास्वः पृष्ट्यामयः । रेश्मश्छिनंन्नं * *
* * वेप्सितां * ;
ख उ. राजाश्व (शृ-$ज_३$) प्रष्टियामिव ।
ग मा, ज. रेष्मछिन्नं * * ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ आञ्जनस्य मधुघस्य कुष्ठस्य नलदस्य च ।
तुरो भगस्य हस्ताभ्यामनुरोधनमा भरे ॥३॥

६०.१ अयमा यात्यर्यमा पुरस्ताद्विषतस्तुकः ।
स +इच्छादग्रुवै पतिमथो जायामजानये ॥४॥

२ +अश्रमदियमर्यमन्नन्यासां समनं यती ।
अङ्गोन्वस्या अर्यमन्नन्याः समनमायति+ (<-सि*?)॥५॥

---

३ क का. * . . गस्य ; शौ. * मदुघंस्य; ख उ. * नळदस्य * ।
घ का. * – मनिरोयनमा * ।
४ क-ग का. इमा . . तस्तुंगः * वैश्छायदग्रुवी . . ; ख शौ. . द्विषितस्तुपः। अयं ग्राह्यः। $ज_3$ . . यात्मर्य . . । भस्तुकः ॥ . . . माथो . . . ॥
५ का. . . अश्लपर्यमर्यमहंन्यन्यासं शमनं *। मङ्गोन्यस्यार्य मन्यंन्यश्चमनमायती ।
क उ. अश्रमदीय . . . ; ख का, मा, $ज_3$, ना, ला . . . शमनं(सायण)*।
गघ मा. * न्यस्या अर्यमान्यन्या . . .॥ $ज_2$. म ... (ज. न्व →)न्नस्या ...।
घ उ. . . . समनमा इति ॥ द्र. पाठः संशयितः। ख-घ सा. शमनम्। समंनं=विवाहसभा (Bergaigne; द्र. Lanman 1905 : 326)। घ का. च(<श?)मनमिति विहाय सर्वत्र समनमिति पाठः। 'शमनान्वयामसि' शमनकर्मकः अनु-इधातुः पै.६.३.९ मन्त्रे पठयते, अत्रापि घ-पादे आ-इ धातुरनुमातुं शक्यमिति किञ्चित् संशयपदम्। पै. ६.३.९ मन्त्रपाठः असंशयितः स्याच्चेत् तर्हीह शमनमिति गृह्येत। न कश्चिदत्र निर्धारणोपायः। शौ. अङ्गो न्वर्यमन्नस्या . . .। उ. 'आ इति' इति आयति इत्यस्यैव विकारः। आथर्वणसम्प्रदायेन तस्यैवेष्टत्वात् आयति इति रक्षितः। अन्वयानुरोधात् 'अन्या' इति ह्विट्नीकृतः शोधः! पाठेषु ऊष्मान्तत्वं तु सार्वत्रिकम्। व्यत्ययेन एकवचनमिति सायणः। उभयमेव निष्प्रयोजनम्। अन्यत्र सि <> ति इति विपर्ययदर्शनात् (१८.२१.४ख का, उ पश्यति <*पश्यसि, १६.८९.५ घ उ. पारयासि <पारयाति; भट्टाचार्य १९९७, भूमिकाः xlviii अपि द्र.) *आयसि इति मूलपाठः अनुमेयः। अन्याः इत्यत्र प्रयोज्यकर्तुः णौ कर्मणि २या, तस्य च अर्यमन् (त्वम्) इति कर्त्रा अन्वयः। सायणेन अङ्ग उ अनु इत्यर्थः कृतः। पादादौ सम्बुद्ध्यन्तम् अङ्ग इति पदमन्यत्रालब्धमिति अङ्गा उ अनु इति अन्वयश्चिन्त्यः। ग्रिफ़िथ्स् २००९ : ४७ अपि द्र.।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ धाता दाधार पृथिवीं धाता द्यामुत सूर्यम् ।
धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम् ॥६॥

६१.१ मह्यमापो मधुमदेरयन्त मह्यं सूर्यो *अभरज्ज्योतिषा कम्।
मह्यं देवा उत विश्वे तपोजा मह्यं देवः सविता व्यचो
धात् ॥७॥

द्र. ३कख अहं दाधार पृथिवीमुत द्यामहं सिन्धूनजनं सप्त साकम्।
२ गघ अहं सत्यमनृतं यद् वदाम्यहं वाचं परि
सर्वामिषिञ्च ॥८॥

द्र २कख अहं विव्यज्मि (<विव्यच्मि) पृथिवीमुत द्यामहमृतूनसृजे+
सप्त साकम्।
३गघ अहं वाचं परि सर्वामभूवं यो अग्नीषोमावजुषे
+सखायौ ॥९॥

---

६ का. सा. अ.।
क मा. . . . पृथिवी ; ख ज$_{३}$. * दा . . . * ॥
७ ख-घ का. * * भरज्योतिषागम् मह्यन् * * * समो(→ मनो)ता * * * व्यचोधा ।
क मा, ज, ना. . . . मधुमते . . . (-ररान्त-ज$_{३}$); म. . . . देरयंत ।
ख उ. * * अभर (रु ज$_{३}$) ज्यो . . . । मा, ला. . . . योतिषा *। शौ. . . देरयन्तां; पै. लङि आडभावः (inj)।
८ ख का. . सिन्धून्सृजे * * । * तस . . वादाम्यहं * पतिस्सर्वाभि . . .। द्र. का. सस्वरः पाठः
क मा. मह्यं * . . . ; ख उ. . . . सिन्धुन . . . * *। ज$_{३}$. . . . न्धुनिजनन् * * ।
घ मा. . . . वाच * . . . ॥ ज$_{२}$. * * सर्वामि → भि . . . ॥ शौ. . . दैवीं परि वाचं विशश्च। पै. . . वाचं परि सर्वाम् इषिञ्च?
९ का. * विनेज्मि . . . महमृतून्सृजे ससप्त * . . . सर्वां बभूवं * ग्निषोमाविदुषे सखायुः;
कख उ. . . . . . महं मृत्युनसृ (शृ ज$_{३}$) . . .। शौ. * विवेच
गघ मा, ज. . . . र्वामभूवन् (वं ज$_{२}$) * ऽग्नि . . . सखायै (ज$_{३}$. सुखाये) ॥ ॥ म. . . . सखाये ॥ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५९.१ अनडुद्भ्यो नः प्रथमं धेनुभ्यस्त्वमरुन्धति ।
अधेनवे वयसे शर्म यच्छ चतुष्पदे ॥१०॥

२ शर्म यच्छात्योषधिः सह देवैररुन्धती ।
करत् पयस्वन्तं गोष्ठमयक्ष्मां उत पूरुषां (<षान्) ॥११॥

३ विश्वरूपां सुभगामच्छावदामि जीवलाम् ।
सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः ॥१२॥

९३.१ यमो मृत्युरघमारो निर्ऋथो भवः शर्वोऽस्ता शिखण्डी ।
देवजनाः सेनामुत्तस्थिवांसस्ते अस्माकं परि वृञ्जन्तु
वीरान् ॥१३॥

---

१० का. अनळूद्भ्योन्नष् * . . र्भ्यवमरु . . । मधेनवयवेशे * यश्छद *।
क मा. अनुड्भ्यो . . .; ज, ला. अनुडुद्भ्यो . . .;
ख उ. . . भ्यस्तम . . . ।
ग मा. अधेनदे * ; ज$_3$. * वयस्ये;
११ का. शम यश्छत्वो (= शौ.). . . देवीररु . . । * . . गोष्ठमुत यक्ष्मामुत पौरुषाम्। मा. * . . . धी . . . न्धति । . . . यक्ष्मं * *॥
क ज$_3$. . दधिः; ख ज$_2$. . न्धति → ती । ज$_3$. . न्धति ।
घ ज$_2$. . . . पुरुषां । द्र. शौ. सह देवीररुन्धती। सा., ह्विट्नी. सहदेवी। सर्वत्र विसर्गान्तत्वात्तदसाम्प्रदायिकम्, अपि तु ओषध्या नामेति युज्यते।
१२ क मा, ज$_3$. . . रुपां . . . ;
गघ ज$_3$. * * . . . हेति * नयन्तु * ॥
घ मा. . . . गोभ्य ॥
१३ का. इमो . . . निर्ऋतो भव शर्वस्त्वा * । . . जना स्येनामुत्तस्थिवाँस स्तेस्मा . . वृञ्जन्ति वीराः;
ख मा, ज$_3$, म. ऽ नास्ति । ग म. * . . स्थिवान्तसस्ते . .॥
घ मा. * स्माकं * वृणक्तु * ॥ ज$_3$. ऽस्माकं * न्वञ्जन्तु * ॥
ज$_2$. ऽ → अस्माकं * * * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ मनसा होमैर्हरसा घृतेन शर्वायास्त्र* उत* राज्ञे भवाय।
नमस्येभ्यो नम एभ्यः कृणोम्यन्यत्रास्मदघविषा
नयन्तु ॥१४॥

३ त्रायध्वं नो अघविषाभ्यो वधादग्नीषोमा मरुतः पूतदक्षाः।
विश्वे देवा मरुतो वैश्वदेवा वातापर्जन्ययोः सुमतौ
स्याम ॥१५॥

१९.१५

शौ. ७.५२.२ सं जानतां मनसा सं चिकित्ता(<त्वा) मा युत्सत*
मन्युना दैव्येन।
मा घोष उत्थाद् बहुले विनिर्हते मेषुः
पत्तदिन्द्रस्याहन्यागते ॥१॥

---

१४ का. . ईरमा . . स्त्वीदराजे भावाय । . . स्तेभ्यो * येभ्यष् . . दघ हविषा * । ख उ. शर्वायास्त उद * * । मा. शर्व्वायास्त उदराः ज्ञे *।
ख ज$_2$. शर्द्धया . . . * ।
१५ का. त्रायध्वन्नो अघहविषभ्यो . . दक्षा। . . . मरुता . . . पर्जन्येख्वौ * * zzz२z
ज$_3$ . . . ध्वन्नोऽघ (ध्वनोघ-ना.) . . . पर्जयोः सुमतो * ॥ ॥१४॥॥
ख मा. . . . दग्निसोमा * * । शौ. * वरुणः * ।
१९.१५.१ का. सञ् * * सं जिगित्रा स्त यश्छतु * * । * * युक्ता * . . . मेषप्विवति रिन्द्रस्याह्ना . . ॥
कख मा. स * . . . * युछ (अन्यत्र - युच्छत) * * । शौ. * जानामहै * * चिकित्वा * युष्महि (युत्स्महि, युछ्महि) मनसा दैव्येन घोषा उर्त्थुर्बहुले . . .॥ पै. ख युत्सत। नार्टेन् १९६४ : २१४, २१५ अपि द्र.।
क ऋ १०.३०.६ग * जानते * * चिकित्रे;
ग उ. . . . * (मा. वहुने) विनृहते; ज$_3$. . वहुळे विदृहते;
घ मा, ज. . . . सत्तदि . . . ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३.८.५,६.९४.१ सं वो मनांसि सं व्रता समाकूतीर्नयामसि ।
इमे ये विव्रता स्थ तान् वः सं ज्ञपयामसि ॥२॥

७४.२ संज्ञपनं वो मनसो अथो संज्ञपनं हृदः।
अथो भगस्य +यच्छ्रान्तं तेन सं ज्ञपयाति वः ॥३॥

१ सं वः *पृच्यन्तां तन्वः सं मनांसि समु त्वचः ।
सं वो ब्रह्मणस्पतिः सोमः सं ज्ञपयाति वः ॥४॥

७.५२.१ संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः ।
संज्ञानमश्विना युवमिहास्मासु नि +यच्छतम् ॥५॥

---

२ का. सँ * . . . न्नयामसि। इमं * विह्वतास्तान्नस् * ज्ञयामसि ।
क ज$_{२}$. * * * संव्रता → (सव्रतां); म. सम्वो * सव्रता;
ख मा, ना. . . . कूतिर्न . . . । ज$_{३}$. . . . जूतीनि . . . ;
गघ मा. इमौ ५ खगयोर्मध्ये एवं पठितौ - * * विद्रस्थ अस्वसे * ॥
घ ज, म. तां * * * ॥ शौ. . . र्नमामसि अमी * * स्थन् . . . र्नमयामसि।
३ का. . . पदं * * थो संज्ञपदं * * * यश्छान्तं * * * माम् । शौ. . .
. संज्ञपयामि * ॥
४ ख-घ का. * * प्रच्यन्तां * स मनाँसि सम त्वच । * वां * सोम * स्पर्शयाद्व
माम् ; शौ. भगः सं वौ अजीगमत्। पै. < * * गमयाति * ?
क मा. * * प्रभूतां * ; ज$_{३}$. * * प्रच्यन्तां * ; ज$_{२}$. * * प्रच्यं → च्यतां
* ; म. सम्वः प्रच्यंतां तनवः; ग म. सम्वो . . . ;
घ मा. * * . . यात * ॥
५ का. * न स्येभ्यस् . . सरणेभ्यः . . . स्मासु * यश्छताम् ;
मा. * न स्वेभ्यो सज्ञा . . . । . . . मस्विना . . . ॥
कख ज$_{३}$. . नन्नः * सज्ञा . . . । ख ज$_{२}$ सज्ञा . . .। घ ज$_{३}$. . * छतं ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६.७४.३ यथादित्या वसुभिः संबभूवुर्मरुद्भिरुग्रा अहृणीयमानाः।
एवा त्रिणामन्नहृणीयमान इमं जनं संमनसं कृणु
त्वम् ॥६॥

७५.१ निरमुन्नुद ओकसः सपत्नो यः पृतन्यति⁺ ।
७-९ तै. ब्रा. ३.३.११.३-४ निर्बाध्येन हविषेन्द्र एनं पराशरीत् ॥७॥

३क-ग,च इहि तिस्रः परावत इहि पञ्च जनाँ अति ।
इहि सप्ताति रोचना यावत् सूर्यो असद् दिवि ॥८॥

२ परमां त्वा परावतमिन्द्रो देवो अजीगमत् ।
३घङ यथा न पुनरायसि शश्वतीभ्यः समाभ्यः ॥९॥

---

६ का. . वसवस्सम्बभूवु . . . अह्णिणीयमाना । यवा . . . मानमिमं जना * * * ;
कख $ज_३$. सम्वुभूवुर्मरुभि . . . । ख म. - र्मद्भिरु . . . ।
ग उ. * त्रिनाम . . . ;
गघ मा. . . . मन्मह्व . . . समनसं * * ॥
घ ज. * * सम्म . . . ॥
७ का. . . मन्ददोकंशत् * * पृतङ्कृधि । . . . शरी।
कख मा. निरमन्युद ओकलाः . . . प्रतन्वति → त ।
म. . . . ओकस (= ला.) . . . प्रतन्वति (= ना, ला.);
ज. . . . प्रतन्यति . . . ;
ग $ज_३$. निर्वाध्वेन . . . ;
८ खग का. . . . जनां अनु इह चत्वातु * ;
क मा. इह . . . ;
९ क-ग का. परमा * . . . . * अचीक्लिपत् । यद्यो (→ द्वो) * . . . ;
ख मा. . . . * अवीगमत् । शौ. * नुदतु वृत्रहा। तै. ब्रा * नयतु वृत्रहा।
घ उ. सश्वतीभ्यः * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पै.५.२३.४(२.२६.४) प्रतीचीनफलो हि त्वमपामार्ग बभूविथ ।
शौ.७.६५.१ सर्वान् मच्छपथाँ अधि वरोयो यावया त्वम् ॥१०॥

पै. ५.२३.५ यच्च भ्रातृव्यः शपति यच्च जामिः शपाति नः ।
शौ. २.७.२ ब्रह्मा *यन्मन्युतः शपात् सर्वं [+]तन्नो अधस्पदम् ॥११॥

शौ. २.७.१ अघद्विष्टा[+] देवजूता वीरु[+]च्छपथयावनी ।
उद्रा* *मलमिवावानैक् [+]सर्वान्मच्छपथाँ अधि ॥१२॥

६.७६.१ यदेनं परिषीदन्ति समादधति चक्षसे ।
संप्रेद्धो अग्निर्जिह्वाभिरुदेति हृदयादधि ॥१३॥

२ अग्नेः सान्तपनस्याऽहमायुषे पदमा रभे ।
अद्धातिर्यस्य पश्यति धूममुद्य[+]न्तमास्यतः ॥१४॥

१०-११ का. . . . फल इत्यष्टर्चिक्यू ।
उ. प्रतीचीनफल इत्याष्टर्चिक्यौ (ष्टार्चिकौ मा. ष्टर्चिक्यौ ज.)

१२ का. . . द्विष्टो . . . उध्नाबल . . . वानैस्सर्वी अश्छपथाँ वधि ।

क मा, म. अघद्यूष्टा . . ; $ज_3$. अघदुष्टा * ; $ज_2$. अघद्रू → ? ष्टा *;
ना. अघद्युष्टा . . .; कख मा. . . . देवजुता विरुछप . . . ।

ग उ. उह्वा वळ . . . ; द्र. उत्कलीयलिपौ ह-द-कारयोः सादृश्यमस्ति।
शौ. * देवजाता * छपथयोपनी। आपो . . . प्राणैक्षीत् . . . ॥ आप.
श्रौ. ६.२०.२ अथर्व्युष्टा * वीडु छपथजम्भनीः। आपो . . .
प्राणिजन्नस्मतु शपथाँ अधि ॥

१३ का. येनेदं . . . सम्प्रयद्धौग्नि . . . भिर्हृदयेधृद आदधि ।

क मा. . . . दत्त ; $ज_3$. यदेन . . . न्ती ;

ख उ. * चक्षुषे । ग मा. * . . . जिह्वा . . . ;

१४ का. अग्ने . . . । धातुर्यस्य पश्यतममद्यन्तश्श्रितः ;

गघ मा. अर्द्धाति . . . मुहंत . . . । $ज_2$, म. . . . मुद्यन्त . . . ॥
$ज_3$. अर्द्धात्रि . . . पष्यति धूमसद्यंतम्नस्यतः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ योे अस्य समिधं वेद क्षत्रियेण समाहिताम् ।
+नाभिह्वारे पदं नि दधाति स मृत्यवे ॥१५॥

४ नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव +गच्छति ।
[कख]पै.८.३.१२[कख] अग्नेर्यः क्षत्रियो विद्वान् नाम गृह्णात्यायुषे ॥१६॥

१९.१६

शौ. ६.७७.१ *अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
तिष्ठन्ति पर्वता इमे स्थामन्नश्वा अरंसत ॥१॥

२ य उदानड् व्यायने य उदानट् परायणे ।
आवर्त्तनं निवर्तनं यो गोपा अपि तं हुवे ॥२॥

---

१५ का. * स्य * * * . . हिताः माविह्वारे * * दधातु * * ।
कख मा. * स्य * * क्षयेण समाहतां ।
ज$_{३}$. * ऽस्य * * वक्षेत्र्येण * ।
ग उ. नाभिद्वारे * * ;
घ म. 'स' इति पतितः ।
१६ का. नैनोघ्नन्तु पर्यायिणो * सुन्वाँ इव . . . विश्वा * . . . z अनु ३zz
क मा. . घ्नन्त पर्यायणो ; उ. . पर्याइणो ; ख उ. . सनाङ् * . . . ।
ग ज$_{३}$. . . मन्त्रियो * ;
१ का. अस्था . . . स्तात् . . . ति × × × × (< छन्तुपता?) इमे स्तामन्नश्वारंसत।
मा. अस्था (= उ.) . . स्य पृ . . . स्था * जगत । * * ईमे . . . सत् (= ना.)॥
ज$_{३}$. . . . द्यौचस्था . . . जगत । . . . सत् ॥
गघ शौ. आस्थाने पर्वता अस्थु स्थाम्न्यश्वाँ अतिष्ठितम्।
२ कख का. यदानड्वेनेयदानट्प . . . ।
क मा, ना. * . . . ड्वायने; ज्र. * . . . ड्य(← ड्या ज$_{२}$) यने;
ख मा, ज$_{३}$, म, ना. . . नड्प . . . ।
घ ज$_{३}$. . . . हवे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

× आवृतो न्यावृतोऽभ्यावर्तनमायनम् ।
अग्नेश्चतस्र आवृतस्ताभिष्ट्वा तर्पयामसि ॥३॥

शौ.६.७७.३$^{क-ग}$ जातवेदो नि वर्तय शतं ते सन्त्वावृतः सहस्रं त उपावृतः।
× ताभिरेनं नि वर्तय ॥४॥

शौ.१.२०.१ अदारसृद्$^{+}$ भवतु देव सोमायमस्मिन् यज्ञे मरुतो मृडता नः।
मा नो विददभिभा मो अशस्तिर्मा नः प्रापत् दुच्छुना$^{+}$
द्वेष्या या ॥५॥

२ यो अद्य दैव्यो वधो जिघांसन्* न उपायति ।
कख तु. पै१९.१३.२^{कख} युवन्तं मित्रावरुणावस्मद् यावयतं परि ॥६॥

---

३ का. . . . द्यावर्तन . . . अग्नेश्चतस्रावृ . . . तर्पयमसि ।
क ज$_{२}$. * ऽन्या . . . ;
ख मा. . . . र्त्तनंमा . . . । म. ऽ नास्ति
कख ज$_{३}$. आदृतो(ज$_{२}$.ऽ)न्यादृतो ऽभ्यावर्त्ता . . .।
ग उ. अग्निश्च . . . ।
४ का. . . . सन्त्ववृतस्सहस्रञ्च * तां(भिरे ?)नं * * ।
ख म. शतन्ते संत्वावृतः । ज$_{२}$. शतन्ते . . . ।
ग मा, ज$_{३}$, म. सहस्रन्तु * ।
घ मा. अभिवेनं * * ॥ ॥ ज$_{३}$. अभिरेनं * * ॥
शौ. १६+१६; घ ताभिर्नः पुनरा कृधि ॥
५ का. अदारसुर्भवतु . . . मरुतां * * सा . . सो (→मो) यशस्तिर्दा
* . . ।
क ज$_{३}$. अदारसृग् * ; म. अदारशृक् * ; मा,.ज$_{२}$. अदारशृग् * ॥
द्र. का. पाठे - द् > -र्; तदस्मत्कृतशोधे प्रमाणम्।
ख-घ मा. - यस्मिन् . . . । . . . प्राप्तदुत्सना देष्या * ॥
ज$_{३}$. - यस्यस्मिन् . . . । . . . स्तिमा * प्राप दुत्सुना द्द्वेष्वा * ॥
म. - यमस्मिं . . . ॥ . . * दु (त्स→) त्सुना * * ॥
घ ज$_{२}$. प्रापदुत्सुना * * ॥
६ का. * द्य सैन्यो . . . घांसंनमुपायती । . . . यावयन्तं *।
द्र. का. क = १९.१३.२^{क} ; तत्रायं पादः पठितः ।
क मा, ज$_{३}$. * ऽद्य . . . ; ख उ. जिघांस * * ।
गघ ज$_{३}$. . . . स्मद्धावयतं * । कख शौ. * * सेन्यौ * ऽघायूनामुदीरतें।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ इतश्चामुतश्चाघं वरुण यावय ।
वि +महच्छर्म +यच्छ वरीयो यावया वधम् ॥७॥

शौ.२०.१२५.१ अपेन्द्र प्राचो मघवन्नमित्रानपापाचो+ अभिभूते नुदस्व।
ऋ.१०.१३१.१ अपोदीचो अप शूराधराच उरौ यथा तव शर्मन्
मदेम ॥८॥

शौ. ६.७८.१ तेन भूतस्य हविषा पुनरा प्यायतामयम्।
जायां यामस्मा अविदं सा रसेनाभि वर्धताम् ॥९॥

२ अभि वर्धतां प्रजयाभि+ राष्ट्रेण वर्धताम् ।
ईषा सहस्रवीर्याविमौ स्तामनुपक्षितौ+ ॥१०॥

३ त्वष्टा जायामजनयत्* त्वष्टास्यै त्वां पतिं दधौ।
त्वष्टा सहस्रमायूंषि दीर्घमायुष्कृणोतु मा ॥११॥

---

७ का. . . . श्चाघन् * यावयः * महश्शर्म * वरियो * * ;
क मा. इतस्ता . . . . ;
खग म. . . * वार (→जाव $ज_2$) या। * महत्शर्म यछ ;
घ उ. वरियो (वरिमा-मा) * * । द्र. मा अधः 'योया' इति शोधः। शौ. वरीयो ।
८ का. . . . मित्रान्पापाचो * * । . . . ऊरौ यथा। * * * ।
ख उ. . . . नपावाचो . . । ग $ज_3$. . . . चोपसुरा धच . . . ॥
मा. ८, ९, १०क मन्त्राः पतिताः । ख शौ. ऋ- नपापाचो . . .।
९ ग का. * याममस्माविदं ; $ज_3$. . . . मयः । * जामस्मा * . . . ॥ ग शौ. * * आर्वाक्षुस्;
१० का. * * प्रजायाभि राष्ट्रेनर्धताम् एषा . . . विसौस्त्वावनपक्षिपौ;
घ मा. - विम्वौस्तमनु . . . ॥ उ. . . . मनुवक्षितौ ॥
कख उ. * * प्रजया अभि. . । शौ. पर्यसाभि;
११ क उ, का. * . . . नय;
घ का. . . . माम् । ओं दीर्घमायुष्कृणोत्व माम् z
कख मा. * याया . . नय . . त्वा * * । $ज_3$. . . नयत्वष्टास्ये . . ।
ख म. . . . पति * । शौ. * त्वां पतिम्। ग मा, $ज_3$. * . . । युंषि;
मन्त्रान्ते उ. ॥ ० ॥ श्री ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शौ.६.८०.१ अन्तरिक्षेण पतति विश्वा भूतावचाकशत्।
शुनो दिव्यस्यैतन् महस्तस्मा एतेन हविषा
जुहोमि ॥१२॥

३ अप्सु ते जन्म दिवि ते सधस्थं समुद्र आत्मा महिमा ते
पृथिव्याम् ।
शुनो दिव्यस्यैतन् महस्तस्मा एतेन हविषा जुहोमि ॥१३॥

२ ये त्रयः कालकाञ्जा दिवि देवा इव श्रिताः।
तान् सर्वानह्व ऊतयेऽस्मा अरिष्टतातये ॥१४॥

× यः पुरुषं हूर्च्छयसि श्वा दिव्यो अवीरहा ।
तं त्वाहं ब्रह्मणा नुदे पुरुषं मा परा वधीः ॥१५॥

---

१२ का. ओँ अन्त . . . * स्वर्भूता व्यचाचलत् । सनो . . . स्यैदं . . . ;
जₓ₃. क पादः नष्टः । ख श्वा . . . कुशत् ॥
गघ म. * दिव्यस्यैतं (← तन् ज₂) . . . ॥ मा. . . जुह्वमि ॥
शौ. . . तेना ते हविषा विधेम ॥
१३ का. * * * निवि * * समुद्रात्सा * * * सनो दिव्यस्येदं . . . * *
जुहोमि अप्सु ते जन्म निवि ते सधस्थं समुद्रात्सा महिमा ते पृथिव्याम्
सनो दिव्यसेदं महस्तस्मा एतेन हविषा जुहोमि ।
कं ज₃. * * * * * सधस्थ ;
ख मा. * * * पृथिव्या । ज. समुद्रं (ज₃.→दं) . . . । शौ. समुद्रे अन्तर्
. . .।
ग ज₃. * . . . सैतन्म . . . ; म. * दिव्यस्यैतं (तन् ज₂)
घ मा. . . . जो → जुहोमि ॥
१४ क-ग का. य त्रयक् . . दिविवात् दिवि श्रुता तानि . . महूतये ;
क-ग मा. क्षे * काळकाञ्ज्या . . . । * . . . नह्वा उतये ;
द्र मा,म. ऽ नास्ति । कख ज₃. नष्टौ । ख म. * * * श्रीताः ।
गघ ज₃. * . . . नज्ञ * * रिष्टतातये ॥
१५ का. * * हविरिश्छमि * * अवीरद्ततस्याहं * ददे * * * * ;
क मा, ज₃. * * हृछ्यसि ; ख उ. * दिव्यै * ।
हूर्च्छयसि = अनार्जवेन वा विपरीतं वा गमयसि। द्र. काठ. २५.५।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

× यः पिशङ्गो अयोदंष्ट्रः श्वा दिव्यः परिप्लवः ।
तस्याहं नाम जग्रभास्मा अरिष्टतातये अयं नो
जीवतादिति ॥१६॥

शौ. ६.७९.१ अयं नो नभसस्पतिः संस्फानो अभि रक्षतु ।
असमार्तिं गृहेषु नः ॥१७॥

२ त्वं नो नभसस्पतिरूर्जं गृहेषु धारय ।
आ पुष्टमेत्वा वसु ॥१८॥

३ देव संस्फान[+] सहस्रापोषस्येशिषे* ।
तस्य नो धेहि तस्य ते भक्षीमहि
तस्य ते भक्तिवांसो भूयास्म स्वाहा ॥१९॥

॥ इति तृचकाण्डे चतुर्थोऽनुवाकः ॥

---

१६ का. * * योदंष्टा . . * वरातास्मा अरिष्ट × × ×। अयन्नो . . ।
ख-घ मा. * दिव्य * । . . . ॥ ॥ ख उ. स्वा . . . । गघ ज$_{३}$. नष्टौ।
१७ का. * * नभस्मति * अभि × × × षु * ;
ज$_{३}$. * * नभसम्पतिः * ऽभि * । अस्यमार्तिं * * ॥
ख मा. . . . संस्यानो * * ।
१८ का. तं . . . । * पुष्ट × × ×;
कख मा. * * र्नर्भसस्पतिउर्जं * * । ज$_{३}$. * * नभसस्पति उर्जं * धारयः
। म. * * नभसस्पति (+उ) र्जं * * ।
१९ का. ॅ व संस्फानस्सहस्रपोशिषे । * * धिहि * * * × × × त भधि
र्मासो भूयास्मात् * z४z
मा. देवं संस्यान . . . षोषसे(=उ.)शिषे । . . . * न्ते मक्षीमही . . .॥
क ज$_{३}$. * संस्यान . . . ; ज$_{२}$, म. * संस्यान् . . .;
ख ज$_{३}$. नष्टप्रायः ।
काण्डिकान्ते - का. इत्येकोनविंशतिकाण्डे चतुर्थोनुवाकस्समाप्तः
मा, म. ज$_{२}$. इति त्रृचकाण्डे चतुर्थोनुवाकः ॥
ज$_{३}$. इति त्र्युचकाण्डे चतुर्थोऽनुवाकः ॥ श्री ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९.१७

शौ. ६.८१.१ यन्तासि यच्छसे हस्तमप रक्षांसि सेधसि ।
प्रजां धनं च गृह्णानः परिहस्तो अभूदयम्[+] ॥१॥
२ परिहस्त वि धारय योनिं गर्भाय कर्तवे ।
मयदि पुत्रमा धेहि तं त्वमा गमयागम ॥२॥

३ यं परिहस्तमविभरदितिः पुत्रकाम्या ।
त्वष्टा तमस्या आ बध्नाद् यथा पुत्रं सुवादिति ॥३॥

८२.१ आगच्छत[+] आगतस्य नाम गृह्णाम्यायतः ।
इन्द्रस्य वृत्रघ्नो राज्ञो वासवस्य शतक्रतोः ॥४॥

२ येन सूर्यां सावित्रीमश्विनोहतुः पथा ।
तेन मामब्रवीद् भगो जायामा वहतादिति ॥५॥

१८.१७.१ का. यत्रमे हस्यसप रक्षाँसि सेधति * * द गृह्णान परेहस्तो भूदयम्।
क मा. . . . यंछेसे . . . ; ग मा, ज$_३$, म * धनञ्च * ;
घ मा, म, ज$_२$. अभूतयं । ज$_३$. * अभूयं ।
२ का. . . . गेर्भाय कर्तरः सयदो पुत्र × × × हि उत्तम गमयागमः;
ख मा. योनि * * ।
घ मा. तन्त्यमा . . . ॥ ज$_३$, म. तन्त्वमा . . . म (ः → δ ज$_३$)॥
शौ. . . गंमयागमे॥ उ. परिहस्तः सम्बोधितः।
३ का. . . . मपिभरमदितिः * * त्वमस्या वध्वाद् * * * ।
ग मा. * तमस्य * *; ज$_३$. त्वपत्रमस्या . . .; म. * तस्यस्या * दध्नाद्;
४ का. . . . श्छतागतस्य . . । शतक्रतो ।
ख ज$_२$. * * गृभ्णा → ह्णाम्या . . . । ज$_३$. नागगृह्णायतः ।
५ कख का. * सूर्या . . नोहष्पथाः * साम . . . ।
ज$_३$ * * नोहन्तुः * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३ यस्ते अङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः ।
तेना जनीयते जायां त्वं धेहि शतक्रतो ॥६॥

१०८.१ त्वं नो मेधे प्रथमा गोभिरश्वेभिरा गहि ।
त्वं सूर्यस्य रश्मिषु त्वं नो असि यज्ञिया ॥७॥

२ मेधामहं प्रथमां ब्रह्मण्वतीमृषिष्टुतां प्रपीतां ब्रह्मचारिभिः।
देवानामवसा वृणे ॥८॥

५ मेधां सायं मेधां प्रातर्मेधां मध्यन्दिनं परि ।
मेधां सूर्येणो'द्यतोदीराणा उ तस्तमुः (<भुः?) ॥९॥

शौ. २.२९.१ पार्थिवस्य रसे देवा भगस्य तन्वो बले ।
आयुरस्मै सोमो वर्च आ धाद् बृहस्पतिः ॥१०॥

---

६ का. येस्ते अङ्कुसो वसुदानवो वहन्निन्द्र * * जत्यते . . .।
क मा, ज$_{३}$. * अंकुशो * ; म. * ङ्कुशो * ;
ख मा, ज$_{३}$. वृहनिन्द्र * । ग मा. * जनियते * ;
घ मा, ज$_{२}$. * * शतक्रतोः ॥
७ का: त्वन्नो . . . त्वन्नो वसुदं यज्ञेया ।
कख मा. * * मेः धे * गोभिश्वे . . . ।
८ कख का. . . . तीमृघुष्टतां प्रणिहितां * ; मा. . . ब्रह्मणश्पतिमृष्टिष्टुतां प्रपितां (= ज) * । ज$_{३}$. मेधामह्यं . . . ।
९ का. . . . मध्यंन्दिनस्परि । . . . तोधीराणा उतस्त्वम.
क ज$_{३}$. . . . प्रत - ; ख ज. * मध्यंदिनं * ।
कख मा. मेधा * मेधा . . . मध्वंदिनं परिः ।
ग मा, ज$_{२}$, म. * . . णोयतो -; ज$_{३}$. * . . . णोक्षतो -;
द्र. घ <उदीराणा उ तस्तभुः *॥ भुः > मः !! शौ. * सूर्यस्य रश्मिभिर्वचसा वैशयामहे।
१० का. * * देव . . . आयुरमै * * धाता * ;
ख म. * तनवो * । ग शौ. आयुष्य्]मस्मा अग्निः सूर्यो;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पै. १५.५.२ आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्योजः ।
शौ. २ रायस्पोषं सवितरा सुवास्मै शतं जीवाति
शरदस्तवायम् ॥११॥

शौ. ३ आशीर्ण ऊर्जमुत सुप्रजास्त्वं दक्षं दधातु द्रविणं सुवर्चसम्।
संजयन् क्षेत्राणि सहसाहमिन्द्र कृण्वानो अन्यानधरान्
सपत्नान् ॥१२॥

शौ. ६.६८.१ आयमगन् सविता क्षुरेणोष्णेन वाय उदकेनेहि ।
आदित्या रुद्रा वसवः सचेतसः सोमस्य राज्ञो (अ)वपन्
प्रचेतसः ॥१३॥

३ येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्।
पै.२.५२.३ द्र. तेन व्रह्माणो वपतेदमस्याश्रा(<स्ना)मो दीर्घायुरयमस्तु
वीरः ॥१४॥

---

११ का, ज$_{2}$, म. आयुरस्मा इत्येका । मा, ज$_{3}$. आयुरस्मै इत्येका ।
द्र. ख उ. . . धेह्योनः । उ. न-ज- (   ) कारयोः सादृशयात् का.
पाठः गृहीतः। प्रथमखण्डे अन्यथा विवेचितम्।
१२ का. . प्रजास्त्वा दक्ष धासु * * । संजयत् . . . अन्याँ अधरान् *;
मा. आशीन उर्य . . सुप्रणस्त्वं . . . । सञ्जयन . . . कृणवानो . .
. नधरा * ॥
क ज$_{2}$. म. आशीर्न . . . ; ज$_{3}$. आशीन उर्ज . . . ;
ग ज$_{3}$. सञ्जयन * सहसा ; गघ ज$_{2}$. सञ्जयन् . . धरान *॥
क-ग शौ. . . . सौप्रजास्त्वं दक्षं धत्तं * सचेतसौ। जयं क्षेत्राणि सहसायमिन्द्र;
१३ का. आयं मगं सनिभा . . वायवुदकेनएहि । . . सुचेतसस् * * वपन
*; द्र. पत्रस्याधः का. 'येनावपत्सविताक्षुरेणचूडकरण' इति । १२-
१३ सस्वरःपाठः ।
मा. . . . उदकेनयेहि । * * * सचेत * * वपन * ॥
ख ज$_{3}$. . . . णाष्णेन * . . . । * * * म्रवेन्नसः * * * पचेतसः ॥
१४ घ का. मस्याश्यामोदीयुरय . . *।
ख-घ ज$_{3}$. से × × × × व्रह्माणो वपन्ते . . . श्रीमोदीर्घो . . . ॥
ग मा. * व्रह्मणो . . . ; शौ. गोमानश्वंवानयमस्तु प्रजावान्। द्र. पै.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२क-ग अदितिः श्मश्रु वपत्वाप उन्दन्तु वर्चसा ।
धारयतु प्रजापतिः पुनःपुनः सुवस्तवे ॥१५॥

१९.१८

शौ. ६.९०.२ यास्ते हिरा धमनयोऽङ्गान्यनु विष्ठिताः ।
तासां ते सर्वासां साकं निर्विषाणि ह्वयामसि ॥१॥

१ यां ते रुद्र इषुमास्त(<स्थ)दङ्गेभ्यो हृदयाय च ।
इमां तामद्य ते वयं विषूचीं वि वृहामसि ॥२॥

३ नमस्ते रुद्रास्यते नमः प्रतिहिताभ्यः ।
पै. १.३७.२ नमो विसृज्यमानाभ्यो नमस्त आयताभ्यः ॥३॥

× अवाचीः परि मूर्ध्नो+ यास्ते धमनयः शतम् ।
तास्ते प्र भिद्यन्तां पृथगनु त्यं लोहितावटम् ॥४॥

---

१५ का. अदिति . . . पुनष्पुनम्सुवस्तवे सुवस्तवे z१z
क मा. स्मश्रु . . . ; ख ज३. . . . उषिन्तु *।
गघ शौ. चिकित्सतु प्रजापतिर्दीर्घायुत्वाय चक्षसे ॥
१९.१८.१ कख का. यास्त * धपनयरङ्गान्यनु विष्ठिता ।
ख ज२, म. . . . विष्टिताः । ग म. तासान्ते . . . ;
घ मा. * * सर्वास्यां * निविषाणि * ।
ज३. . 'नयो . . सां ते' इति नष्टम् ।
२ का. . . . तदङ्गेभ्यो * * । * त्वामद्य . . विषुचीन् * बर्हामसि।
क मा, ज३. यान्ते . . . ; शौ. . . मास्यद . . . ;
घ मा. विशुचि * * ॥ ज३. विशुर्चीं * * ॥ म. विषुर्चीं * * ॥
३ ख का. . . . हितभ्यः; घ का. नमस्तायताभ्यः;
क मा. अर्वाचीः . . . ;
द्र. ज३. ३घ-४क 'आयताभ्यः ॥ परिमू' इति नष्टम् ।
४ का. * . . मूर्ध्यो यस्ते धमयश् * । . . * हार्ध्यन्तां पृथिङ्निन्यो *;
ग मा. . . . * भिद्यतां; ज२, म. . . * भिद्यंतां ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

× स्यन्दन्तां रोदनावतीरनु त्यं लोहितावटम् ।
घ तु. २.७१.५ब यथास्यामन्तर्न रंसन्ता अनुकूल(म्) इवोदकम् ॥५॥

× प्रतीचीनः सूर्य एतु प्रतीचीः स्रवतः कृताः ।
अवाचीस्ते अस्रः कुल्या इयं +तृणत्त्वोषधीः ॥६॥

शौ.६.९१.१ इमं यवमष्टायोगैः षड्योगेभिरचर्कृषुः+।
स घा ते तन्वो रपः प्रतीचीनमप व्ययत् ॥७॥

२ न्यग् वातो वाति न्यक् तपति सूर्यः ।
पै.१.१११.१ नीचीनमघ्न्या दुहे न्यग् भवतु ते रपः ॥८॥

---

५ का. * लोचनावतीरनु त्वं * . . . मन्तन्नरस्यन्ना न कूल * ;
क मा, म. स्यन्दतां . . . ; ज३. * रोदनावति-;
ग मा. यथास्यामन्त * ; घ उ. . . कूळ * ॥ < कूले? व्यत्ययेन सन्धिविकार। २.७१.५ख अनुकूलमिवोदकम्।
६ का. . चीनातूर्य एति * स्रवीतिष् . . चीस्त हित्वा कुल्यायं पृणक् . . ;
गघ मा. . . . अश्नः * अयं तृणक्तयोषधीः। म, ज. . . तृणक्त्वोषधीः। ना. . . . तृणत्वोषधीः ना. शोधे प्रमाणम्। ऋ. ५.१२.२ख ऋतस्य धारा अनुं तृन्धि पूर्वीरित्यपि। द्वयोरेव रसयोः पृञ्चनसामर्थ्यादत्र पृणक्तु (द्र. का)इति न योग्यम्।
ख ग ज३. ': कृता : । . . . अस्नः' इति नष्टम् ।
७ का. यमं यमम . . . षड्भ्योगोभिरचरक्रश्च । सखा * तन्वं * . . चीन अप ह्वयता ;
क मा, ज३. * . . . ष्टायौगैः ख उ. . . . चकृ (क्र ज३) षुः ।
ग ज२. . . तन्वो → नवो *; ज३. * घां . . ; म. . . . → ते नवो *;
घ मा. प्रतिचिनभप * । ज३ . . . व्ययत्।
८ खग का. तपतिस् * नीवानमग्न्या * ;
कख ज३. न्यगातो * न्वकृत . . . ;
ग मा, ज३, म. नीचीनवघ्न्या * ; घ मा. . . रपिः ॥ ज३. . परः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शौ.३कख आप इद् वा उ भेषजीरापो अमीवचातनीः ।
× आपः समुद्रार्था यतीः परा वहन्तु ते रपः ॥९॥

शौ.६.१०३.३ अमी ये युधमायन्ति केतून् कृत्वानीकशः ।
इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सन्द्या⁺ त्वम् ॥१०॥

× यावतीः सिच आयन्त्यनीकानि यति छन् ।
इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सन्द्या⁺ त्वम् ॥११॥

२ सं परमां ⁺समवमानथो सन्द्यानि* मध्यमान्* ।
इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सन्द्या⁺ त्वम् ॥१२॥

१ सन्दानं वो बृहस्पतिः सन्दानं सविता करत् ।
सन्दानमिन्द्रश्चाग्निश्च सन्दानं भगो अश्विना ॥१३॥

---

९ ख-घ का. . . . आपो . . . रपत । ख मा. . . . चातन। $ज_३$ * * * अनीवचातनी। ग मा, $ज_३$. * समुद्रान्या . . . ;
१० का. * य इध्मायन्ति * . . . इन्द्रस्त्वामर्यान्मान्मा . . . सन्ध्या * ;
क $ज_३$. * * यध . . . ;
गघ मा. . . . हादाम्ना . . . सन्दिहा * ॥
$ज_२$, म. सन्दिया * ॥ $ज_३$. सन्दिहाय * ॥
११ का. यावती सिञ्चायन्तिनीकानीचास्तनः;
ख $ज_२$. . . कानी * * ॥ मा, $ज_३$. . . . जति * ॥
द्र. उ, का. गघ ऊह्यौ ॥
१२ का. * परामा सं मनसादथो सन्ध्यान मध्यमाम् * इन्द्रस्त्वा मर्यान्मान्मा तानग्ने सन्ध्या * ।
उ. * * सममा(ज₃. सम्मा)नथो सन्ध्यानि मध्यमां। . . सन्दिया *॥
ग मा. . . . हाम्ना; गघ $ज_३$. . . . पर्यहाम्ना . . . संन्धिहायत्वं ॥
१३ ख का. . . . संजानं * * ।
मा. सर्वत्र सन्धान-इति, $ज_२$, $ज_३$, म.सन्दान-इति ।
घ $ज_३$. * * ऽश्विना ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा. १३.२२ तु　यास्ते रुचो देव सूर्योद्यतो* दिव्याततताः ।
ताभिर्मामद्य सर्वाभिर्मनुष्येभ्यो रुचे कृणु ॥१४॥

वा. १८.४८　रुचे मा धेहि ब्रह्मसु रुचे राजसु धेहि मा ।
रुचे *विश्येषु शूद्रेषु मयि धेहि रुचे रुचिम् ॥१५॥

×　या रुचो हिरण्ये या अग्नौ याश्च सूर्ये ।
इन्द्राग्नी मयि ता रुचो रुचो धेहि बृहस्पते ॥१६॥

१९.१९

शौ. ६.२६.१　अव्र मा पाप्मन् सृज वशी सन् मृड़यासि नः ।
आ मा भद्रेषु धामसु त्वं धेह्यविह्नतम् ॥१॥

२कख　यो मा पाप्मन् न जहासि तमु त्वा जहिमो वयम् ।
३कख　अन्यत्रास्मन् न्युच्य सहस्राक्षामर्त्य ॥२॥

१४　　का. श्रियास्ते ऋचो * . . यतो . . तता । . . . सद्यसर्वाभिमनुषेभ्यो
ऋचेकृ;
ख　ज$_{३}$. य्यतो . . . ज$_{२}$. य्वतो . . . । मा, म. यतो . . . ।
घ　मा. - र्मनुषेभ्यो * * ॥ द्र. कख उद्यतस् ते या रुचः इत्यन्वयः।
वा. स. यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः।
१५　　का. मा येहि * * * मांम् ऋचे विश्वेषु * * * ऋचे रुचि ।
ग　उ. * विश्वेषु * ; ज$_{२}$. रुचो . . . ; घ मा, ज$_{३}$. महि * * * ;
द्र. ज$_{३}$ खपादाद् दण्डच्छेदो नास्ति ।
१६　क-ग　का. * रुचं हिरण्यये * ग्नौ . . . * । * मैता *;
ख　मा. याग्नौ (ग्नो ज$_{३}$) . . . । ग ज$_{३}$. * मयी * *;
द्र. ज$_{३}$. काण्डिकान्तसूचनं न कृतम् ।
१९.१९.१　　का. * * पाप्मं * * सं * * * * * धामस्वत्वे .. विव्रतम्;
कख　मा. . . . पाप्मन (= ज.) वशा . . . शिं → सि * ।
ज$_{३}$. * * पाप्मन सृज वशा . . . । म. . . सं मृडयाशि * * ।
घ　म. त्विधे . . . ॥ उ. . . . विह्नतं ॥ द्र. रु - ऋकारविपर्यासः ।
२　　का. * * पाप्मं निजहसि . . . . त्रास्मिं * सहस्राज्योसन्त्यः;
ख　म. . . . जहामि ;
गघ　मा. . स्म (= उ) न्यचसहसाभिमर्त्यं ॥ घ ज$_{३}$. . . मन्त्यः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्र. २गघ पथोर्वयं व्यावर्तने निष्पाप्मानं सुवामसि ।
३गघ यो नो द्वेष्टि तं गच्छ† यं द्विष्मस्तं जहि ॥३॥

× शव इवासि सन्नद्धो न भोगमविदं त्वयि ।
शिरो भिनद्मि ते पाप्मन् यथा न पुनरायसि ॥४॥

× इन्द्रो अस्मान् दिवा पातु मृत्योः *पाशात् स्वस्तये ।
द्यौर्नो मध्यतः पातु भूमी राज्ञी स्वस्तये ॥५॥

× सूर्यो अस्मान् दिवा पातु मृत्योः पाशात् स्वस्तये ।
वातो नो मध्यतः पात्वहारात्री स्वस्तये ॥६॥

---

३ का. पथोव्य * निष्पाप्मात्वं * । . . . तँ यन्द्विष्मंन्तं * ।
खग मा. निष्पाम्पानि * । य * देष्टि * * ;
घ $ज_3$. य. . . स्त * ॥ $ज_2$. * दिष्म . . * ॥
४ का. सवैवासि सन्नद्धौ नाभो . . . श्वै । * * * ;
द्र. ४ गघ - प्पन् इत्यत आरम्भ ५ग द्यौ - इत्यवधिको भागः पतितः।
क $ज_3$. * इवात्तिसंनद्दो; म. श्रव . . . ;
ख $ज_3$. . . . दंन्त्विपि । $ज_2$. * . . . दन्वयि ।
कख मा. . . संनद्धो मभो . . ।
गघ मा, $ज_3$. . . . पाप्मन जहासि * * . . .॥
५ का. न्नोमध्यतष् * * राज्ञे * । द्र. ग मध्यतष्पाव इत्यस्याधः श इति। कख नास्ति ।
ख उ. * पाशा * ।
६ का. * स्मन् * * . । अतो * * पाव ;
द्र ६घ-७ग 'अहारात्री . . . पान्व' इति भागः पतितः ।
क $ज_3$. * * न्दिवा * * ; ख उ. पादः ऊह्यः ।
गघ मा, ज. * * * पान्त्व . . . * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

× सोमो अस्मान् दिवा पातु मृत्यो: *पाशात् स्वस्तये ।
आपो नो मध्यत: पान्तु मा नो निर्ऋतिरीशत ॥७॥

× सं वां चक्षुं सं हृदयं मनसावीवनं मन: ।
अस्या: सरूपवत्साया घृते होमेन सर्पिषा ॥८॥

ऋ.खि.१०.१९१.३ यत् कक्षीवां संवननं पुत्रो अङ्गिरसामवेत् ।
(३.१५.३२) तेन *वामद्य देवा: सं प्रिया समवीवनन् ॥९॥

शौ.६.७४.२ संवननं वां मनसो अथो संवननं हृद:।
अथो भगस्य यच्छान्तं तेन सं वानयामि वाम् ॥१०॥

---

७ का. मा वो निर्ऋर्तिं यशत:; ख उ. . . . पाशा * । ख-घ मा. मृत्यो पाशा * । . . रीशत् । गघ ज३. * * मधत: * * * निरितिरीशत् ॥ घ मा, ज३, म. . . . रीशत् (→ त ज२)।

८ का. सर्वां . . . वनम् मन . . . घृत (→ तं) * * ।
द्र ख . . . म इत्यस्योपरि प इति ।
क मा. * वा * * * ; म. सम्वा * * * ; ग मा. * सरुप . . . ; घ ज२ 'न सर्पिषा' इति नष्टम् ।

९ का. * कक्षवा * पुत्रौ . . रसमवे । * मानद्य * सं प्रियो (→ यौ ?) . . नम्;
क ज३. नष्ट: पाद: ।
कख मा. * * सम्व . . अङ्गीरसारसा (= द्विरङ्कनम्, dittography). . ।
ग उ. * मामद्य * ; ऋ. खि. * नोद्य विश्वे * * प्रियाँ * ।
घ मा. . . . समवीवरन् ॥ म. संप्रियो . . . ।
द्र. मा, ज, म. उत्तरत्रापि बहुलं सम्व इति ।

१० का. * वाङ् मनोथो * हृद । अअथो * यश्छान्तं * * ज्ञपयाति माम्; शौ. . . ज्ञपयामि व:॥ द्र. पत्रस्य दक्षिणपार्श्वे 'यो' (?) इति ।
ख ज३. चाथो . . . । घ मा. * * * वा ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

× अहं ते मनसा मनश्चक्षुर्गृह्णामि चक्षुषा ।
एवा परि ष्वजस्व मा यथासन् मयि ते मनः ॥११॥

गघ पै.१९.१४.२गघ आ रथस्येव चक्रे अभि मा वर्ततामसौ ।
२ का. . . . द्रवावाँ सात् प्र तिष्ठा व्यचाकशः * * दायाहं भूयासमुत्तमः।
मा. . . . द्रर्वाङ् माति. . . । सपत्ना * आदायथा. . . ॥
३ का. * निर्द्रवत * * ह्यास्त्वि * अमूह्य. . मपिवत् सामस्तदनु ह्पि पतं स्वतनूहिन स्वः;
मा. उतिष्ठात निद्रवत(= उ.) * * वैहास्ति * । . . . मद्भि * * तन्न वध्वं सुदती रिहिनंस्तत् ॥
ख ज. . . . न्यंचनं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घ १९.२५.१२[घ] ये अस्माकं सबन्धवो विष्ठिताः पृथिवीमनु।
तेषामिन्द्र इव देवानामहं भूयासमुत्तमः॥४॥

ये अग्नयः पार्थिवा आहिताः पृथिवीमनु।
घ ऋ १०.१८६.२ तेषामसि त्वं सङ्ग्न्थे स नो जीवातवे कृधि॥५॥

क तु माध्य.१२.४६[घ] चित्त(<तः)स्थ परिचित्त(<तः)स्थाग्नय स्थ[+] निहवा नाम।
ते नो मा नि ह्वध्वं तेभ्यो वो नमो न वो हवमेमि
यो अस्मान् द्वेष्टि यं वयं द्विष्मः स वो हवमेतु ॥६॥

इन्द्राग्नी पुनरा कुरुतं[+]न एता स्थिरवीरावपरा वीतगू।
अस्माकं सर्वा निहवे सन्त्वेता[+] वयं विद्याम गुह्यं नाम
गवाम् ॥७॥

---

४ क-ग का. यो * सम्बन्धवो. . . ।. . . मिन्द्रीव. . -;
मा. * * सम्वन्धवो. . . ।. . . देवामहं. . . ॥
म. . . . ईव देवामहं. . . ॥
५ का. आग्नयष् * हिता. . . ।. . . सङ्गते. . . ।
६ का. . . . स्त * *।. . . ववध्वन् * * नवो * * हंवचीमि * स्मान्.
. . ववो. . मीतु । द्र. क माङि लुङ्।
खच मा. . . श्च(= उ.) निवनं हव्यनामः । . . . निकध्वं * * नमा * *
हव्यमेमी * स्मा * * * द्विष्मः ॥[३]
ख म. . . (+ निवनं) निहवा * ।
च म. . द्विष्मः ॥[३] हवमेतु ॥[३] हवमित्यतः पूर्वमवकाशः अलिखितः ।
ङ ज. * अस्मां. . . ;
७ का. . . . कूतंनयतु. . . वपरा. . गौ । * * विहवे सन्त्वेता * विध्याम
गुह्यन् * * ;
क म * . . . कृतन्न * ; मा, ज, ना. कुरुतन्न *;
ख मा. . . . वीतग्यु । म. . . . वीतगू → गु ।
ग मा. * स्म सर्वा निह्वो संत्त्वेषा; ज, म, . . . सन्त्वेषा(षां ना.)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापते अनु नि क्रन्दय विश्वे देवाः पदवायाः सन्त्वासाम्।
आदित्या अनुसंगत्य शूरा इन्द्रज्येष्ठाः पुनरा
वर्तयन्तु ॥८॥

इन्द्र प्रणेतर्वर्धय माश्विना मां वहतमाश्वश्वा।
ऐन्द्राग्नं वर्म प्रतिमुञ्चमानो यथोभयेभ्यश्चारु
समितिमावदानि॥९॥

चारुवाक् चारुवदनश्चारुसंकाशनो नृभिः ।
घ शौ ८.५.२२घ +अद्वेष्यप्रतीकाशो जिगीवाँ अपराजितः ॥१०॥

२०.३०

१-३ शौ.७.९० अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम्।
ओजो दासस्य जम्भय यदेतदस्य संभृतं
मधु तदिन्द्रस्य वि भजावहै॥१॥

---

८ क-ग का. * रनु क्रन्दय * * * . . सम् । त आदित्या * गश्छन्ति * ;
ख मा. . . . वा (म. याः →) त्याः संत्वासं । म, ज. संत्वासां ।
ग उ. . . . सुरा;
९ का. * प्रणेतु. . . मां अश्ववान्वहतु मां (×; मुम्व. स्यश्वा). . ग्निं * *
योभये. . . समितु. . . ।
कख मा. * . . . वर्धया मस्मिना मा वहुतमाश्वशा (= म) ।
ज. . . . माश्मिना * . . . ।
घ म. . . . वदामि → नि ॥
१० का. चार्वाक् चार्वदन. . सङ्काशिनो * । यद्वेष्याष्. . . जिगिवां *z५z
कख मा. . श्चारुसंका (→ ज्ञा) सनोतभिः । म. . श्चारुसंकासनो * ।
ग-घ उ. अद्वेष (ज, म. अद्वेष्व). . . जिगीवाङ् * ॥ऋ॥ २०॥२९॥
२०.३०.१ का. * * पुरणवद्. . . तमोजो * जम्भयम् ।. . . तदेतु सम्भृतं
मरुतरिन्दस्य * . . वही;
क मा. * * पुराणव; घ उ. यथेतदस्य * ; मा. . संभृता;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

म्लापयामि +भ्रजः शुभ्रं वरुणस्य व्रतेन ते।
यथा शेपो अपायस(ः) स्त्रीषु चासो अनावया:॥२॥

अवस्थस्य क्लदीवतो भङ्गुरस्य नितोदिनः।
यदुत्ततमिव तत् तनु यदाततं नि तत् तनु॥३॥

अमिम्लपन्ते तन्वं क्लीवं त्वा वीरुधाकरम्।
अन्तःकोश इव कोशेषु स्त्रीष्वप्याकृतश्चर॥४॥

आ नो मेदं गृहपतिर्दधात्विन्द्रेण मेदिना ।
आ नो मेदं सरस्वत्या नो वहन्तु सिन्धवः॥५॥

मेदं धाता मेदं पूषा मेदमिन्द्रो दधातु मे।
मेदं मे अश्विनोभा धत्तां पुष्करस्रजा॥६॥

२　　का प्लापयाबिभ्रति शुक्र * * त । * शेषो यगु स्त्रीष जासु त्रामया ।
कख　मा. माप्लयामि व्रज (ज, म. व्रजः) वरुथस्य * * । क शौ. शिभ्रं;
द्र.　गघ　आयसेलेंटि रूपम्। शौ. * * अपायाते * चासद . . . । अत्र
अपायातेः प्र. पु.।
३　　का. . . . स्थश्च त्तवजीवतु भङ्गुरश्शमितोदिवः यदात्तमिव * *
दात्तनूमिव तत्तनू ।
गघ　मा. युदुन्ततमिवतन् * * * तन् * ॥ कख शौ. * क्लदीर्वतः शाङ्कुरस्य *।
४　　का. अमुंप्लपन्ते * क्लीवन्ते. . . । न्तष्कोशैव कोशेभ्यस्. . . श्चनः ।
क　मा. . . . तन्नवं; ज, म. . . . तनवं;
ख　ज. . . . करं → करु ?
घ　मा. . . . प्यानश्चर ॥
५　　का * * मदं * . . त्विन्द्रियोण * । * * मेधा. . . ।
ग घ　मा. . . . त्या आनो वहन्ति (= उ) * ॥
६　　का. मेदिं * मेदि * मेदि. . * * । मेदिं * . . . . धात्तां. . . स्रजः;
घ　मा. . . . स्रजां ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऊरू मेदय मे वाहू अष्ठीवन्ता †उरश्च मे ।
वपां पर्यस्म उदरे मेदमिन्द्रो दधातु मे ॥७॥

चर्मण इवोपनीतस्य सर्वान् केशान् वृहामि ते ।
अयस्पात्रमिव ते शिरो यथासत् समरं समम् ॥८॥

॥ इत्येकर्चकाण्डे पञ्चमोनुवाकः ॥

२०.३१

शौ.७.१०७.१ दिवि तारा उदभि श्रन् सप्त सूर्यस्य रश्मयः ।
धाराः समुद्रिया अपस्तास्ते शल्यम*चुच्यवुः ॥१॥

---

७ का. * मेदमे दमे बाहु * उरस्य * अपां पर्यस्य मौदिले मेदि. . * *; का मा. तरू, ज. उरु → रू, म. उरू. . . ; ख उ. * (मा, म. अष्टी. . .) उरुश्च * ॥
ग मा. शपां . . .; ज. व → अपां . . .; ना. अपां . . .; द्र. क < उरु ?
८ का. चर्मणीवो(→δ)वोप. . कामान्वृहासि * ।. . विमत. . z६z विंशतिकाण्डे पञ्चमोनुवाकः z
क मा. * इवोपनितस्य; ख म. सर्वा * * * ।
ग मा. * अयस्यात्रमिव * * ; घ उ. यथासछमरं * ।
काण्डिकान्ते मा.॥ऋ८॥ पञ्चमोनुवाकः ॥३०॥ ॥
ज. ॥ऋ८॥३०॥ इत्येकर्च्चकाण्डे पञ्चमोऽनुवाकः ॥
म.॥३०॥ऋ८॥ अ ५॥५८॥ पञ्चमोऽनुवाकः ॥
२०.३१.१ का. * तानां उत दृशं * * * धरात् * पस्तास्ते शाल्यमुचिच्यवौ ।
गघ मा. धारा समुद्र्या अपः स्ता. . . ;
म. * * स्तास्ते (द्र. 'अप' इति गलितः)
ग ज. समुद्र्या. . . ; घ उ. . . मुचुच्यवुः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शौ. ७.५०.३ ईड़े अग्निं स्वावसुं नमोभिरिह प्रसक्तो वि जयत् कृतं नः।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणं मरुतां
स्तोममृध्याम् ॥२॥

५७.२ सप्त स्रवन्ति शिशवे मरुत्वते पिता पुत्रेभ्यो अप्यवीवतद्
ऋ.१०.१३.५ वृता ।
उभे पिपृत उभे अस्य राजत उभे यतेते उभे अस्य
पुष्यतः ॥३॥

२८.१ वेदः स्वस्तिर्द्रुहण*: स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः ।
तै. ३.२.४.१ हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो हविरिदं
जुषध्वम् ॥४॥

३२.१[क-ग] उप प्रियं पनिप्लु(<प्न)तं युवानमाहुतीवृधम् ।
ऋ.९.६७.२९ अगन्म बिभ्रतो नमः ॥५॥

---

२ का. ईळे * सुवसन्. . . . . प्रसत्तो * दयफ्कृतन्नः । . . . वाचमद्भ्यष्.
. क्षिणिर्मरुता. . सृग्भ्याम् ।
कख मा. इडे. . . प्रसंक्तो विजय कृतन्नः (= म, ज.)। ख शौ. . . चयत् **।
ग म. . . . वाजइद्धिः, घ मा * * . . मृध्यां ॥
३ का. सप्तस् * शिशवो * * पित्रेभ्यो. . वीवत्पद्वतः उभये पिप्रति
उभयेस्य राजहि उमे उभे उभयेस्य पिष्यकः;
क मा. * श्रवन्ती शिषवे (= ज δ) * ; म, ज. * श्रवन्ति. . . ;
द्र. ख . . . तद्वृता। शौ. . . . अवीवृतन्नृतानि।
४ का. मेदा स्वस्तिन्द्रविणस्वस्ति परशुर्वेदिष्परशु नस्स्वस्ति। . . . कामा
ते . . । द्र. द्रुह्लः। पा. ४.२.८० द्र.।
कख मा. वेद स्वस्तिदृहः स्वस्ति पर्शुवेदिः पर्शुनिः स्वस्ति। म, ज. . .
दृहणः * . . .। ना . . . दुहाणः . . .। शौ. . . . द्रुघणः . . .।
ख ज. . . . पर्शुर्नः *। घ मा. . . . रीदं *। म. . . . हविरुदं *॥
द्र. उ. = त्रै।
५ क का. * * परिप्लुतं; ऋ, शौ. पनिप्नतं द्र. अयं पाठो ग्राह्यः।
कख मा. * * षनि. . . . . माहूतीवृद्धं ।
ग उ. * * मनः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३५.२ इमा यास्ते शतं हिराः सहस्रं धमनीरुत ।
तासां ते सर्वासां साकमश्मना बिलमप्यधाम् ॥६॥

३८.१[कख],२कख इदं खनामि भेषजं मांपश्यमभिरोरुदम् ।
येना निचक्र आसुरीन्द्राणी केवलं पतिम् ॥७॥

३६.१ अक्ष्यौ मे मधुसंकाशे अनीकं*नौ* समञ्जनम् ।
अन्तः कृणुष्व मा हृदि मन इन्नौ सहासति ॥८॥

७४.३ त्वाष्ट्रेणाहं वचसेर्ष्यां व्यमीमदम् ।
अथो यो मन्युस्ते पते तमु ते शमयामसि ॥९॥

४ व्रतेन त्वं व्रतपते समक्तोहा विश्वा सुमना दीध्यो नः ।
तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उप सदेम
सर्वे ॥१०॥

---

६ का * यस्ते * हीनां. . . । * * * साकमश्विना बलमिप्यधाम्:
क मा, म. . . . हिरा;
ख मा, म. . . . सहस्र धमनि (नी मा) रुत् ।
ग उ. तासान्ते. . . ; घ मा, म. . . . विळ. . . ॥
७ का. * खानामि. . भिनात्तजम् । एना निचक्रसुनीन्द्रारजी * * ।
ख मा. मापश्य. . . । गघ म. * निच्चक्र. . . केवळं * ॥
८ द्र. का. अक्षौससध्वसङ्काश इति भागो वर्तते । ततः ९-१० मन्त्रौ पतितौ। क शौ. * नौ *; का, ना, मा, कु. अक्षौ . .; ख मातृकाः अनीकर्णौ *।
९ कख मा. . . . वर्च्चस्वेर्ष्यां * । म. त्वाष्टेणाहं. . . ।
१० ग म, ज. तन्त्वा * * * ;
घ मा. * * सदे * ॥ ॥ ॠ१०॥३१॥
द्र. का. शेषः पत्रार्धः रिक्तः । अन्ते तु "इदंपत्रार्धं नास्ति आरधास जीर्णनलभ्यते "zz". इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.३२

द्र.शौ.७.७५.१[कख] प्रजावतीः सूयवसे रिशन्तीर्मा वो विद्युतरन् (<-तयन्)
ऋ.६.२८.७[कख] मोत सेना।
तै.ब्रा. २.८.८.१२[कख]सुगे तीर्थे सुप्रपाणे पिबन्तीः परिवृज्य* वधं गोहनं
चरन्तीः ॥१॥

२ पदज्ञा स्त रमतयः संहिता विश्वरूपा उप नो देवीर्देवेभिरेत।
इमं गोष्ठमिदं सदो घृतेना नः समुक्षत ॥२॥

७६.२ या ग्रैव्या अपचितो अथो या *उपपक्षिया: ।
वि जामन् या *अपचितः स्वयंस्रसस्ता इतो
नाशयामसि ॥३॥

७७.१ सान्तपना इदं हविर्मरुतस्तज्जुजुष्टन ।
ऋ. ७.५९.९ युष्माकोती रिशादसः* ॥४॥

२०.३२.१ द्र. काश्मीरीये १-४ मन्त्राः गलिताः ।
१ का ज. 'तीः सूयव' इत्यत्र पत्रं भग्नम् ।
२ ख <. . . विद्युतयन् ? तु . . . द्युतयन्त ऋ २.३४.२। अर्थः ?
ग मा. . . . सुप्रमाणे * ;
घ उ. परिवृह्य * * * ॥
२ ख मा. * * वीर्देवेभि. . . ।
३ ख उ. . उपपक्षिया । ग उ. * यामञ्जा. . ; मा, म. . पचित *; ना, ज.
. अपचित;
४ खग मा. . . . ष्टनायुस्मा. . रीशादशः ॥ अन्ये रिशादशः॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋ ८[२] यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसात्।
तस्मिन् तान् पाशान् प्रति मुञ्चता यूयं तपिष्ठेन तपसा
हन्तना तम् ॥५॥

३ संवत्सरीणा मरुतः स्वर्का उरुक्षयाः[+] सगणा मानुषेभ्यः।
ते अस्मत् पाशान् प्रति मुञ्चन्तु सर्वान् सान्तपना मत्सरा
मादयिष्णवः ॥६॥

७६.६ धृषत् पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम्।
ऋ. ६.४७.६ माध्यन्दिने सवन आ जुषस्व रयिष्ठानो रयिमस्मासु
धेहि ॥७॥

७८.२ युनज्मि त्वा ब्रह्मणा दैव्येनास्मै क्षत्राणि धारयन्तमग्ने ।
दिदिढ्यस्मभ्यं द्रविणेह भद्रा प्रेमं वोचो हविर्दां
देवतासु ॥८॥

---

५ का. * * मन्तो * दुर्हणायुश्चित्तानि बहुधा जिघांसत् * * पाशात्. . . मश्विना शम् ।
क मा. * * मर्त्यो * दुर्हणायु -(= उ.);
घ मा. * * तपितष्ठन * हंतना * ॥
६ क-ग का. . . . रेणा * * . . क्षया * * प्रास्सुत् * * * *;
क म. सम्वत्सरीणा * * ; ख उ. उरुक्षियाः * * ।
ग मा. * अस्मात् * * मुञ्चतु * ; घ उ. सान्तपना सम्वत्सरा (संवत्सरा ज) * ॥
७ का. धृशत्. . . मध्यन्दिन आ वृषस्व (= शौ, ऋ.) रयिस्थानोरयि अस्मासु * ॥
कख मा. धृषत् * * . . . . (ज. सोसमिन्द्र) वृत्रहा स → शुर * * ;
ग मा, म. माध्यंदिने * * * ; द्र. 'वृषस्व' इति ग्राह्यः ?
८ का. . नास्मे. . यन्त्वमग्ने । द्रैड्ढस्मभ्यं . . वोजो हविर्धां . . जसा। द्र. का. कख सस्वरपाठः । ग शौ. दीदिह्य१स्मभ्यं . .;
क मा. . . /. दैव्योनास्मै; घ उ. * हविरुदां * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१ वि ते मुञ्चामि रशनां वि योक्त्रं वि नियोजनम् ।
इहैव त्वमजस्र एध्यग्ने ॥९॥

८०.३ प्रजापते न हि त्वदन्यो विश्वा रूपाणि महिना जजान।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो
रयीणाम् ॥१०॥

२०.३३

शौ.७.७९.१ यत्ते देवा अकृण्वन् भागधेयममावास्ये संवसन्तो महित्वा।
तै. सं. ३.५.१.२ सेमं यज्ञं *पिपृहि विश्ववारे रयिं नो धेहि सुभगे
सुवीरम् ॥१॥

८२.६ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वा †मनुरद्या समीधे।
घृतं ते देवा आप्या वहन्ति घृतं तुभ्यं दुह्रतां गावो
अग्ने ॥२॥

---

९ खग का. व्योक्त्रं * . . चनम् ।. . . स्रेघाग्ने;
क उ. . . . रसनां; ग मा. . . . त्वमजश्रयेध्यग्ने ॥
१० का. . . . मतिना * । . . कामस्ते . . . अ वयँ * * * z२z
ख उ. . . . यजान (← जजान ज.) ।
घ मा. . . . रयिणाम् ॥ द्र. का. मन्त्रः सस्वरः ।
काण्डिकान्ते ज ॥ ऋ१०॥ ॥३२॥ मा, म, ॥३२॥ऋ १०॥
२०.३३.१ का. यत्त देवाष्कृण्वन्. . . वास्य संवदन्तो * । स इमं * पषुर्विश्व. .
रयिन् * * सुभगां *।
क-ग मा. . . * अकृणुन् . . धेयंममावास्येत् * * । . . * पिपिरिर्हि(=ना.)
* ; घ म. रयिन्नो. . . ॥ म, ज. * * पिपिरिहि *;
२ का. * * ग्रे. . . मनुर्घासमिद्धे । * * * प्यावहन्तु . . . ।
क,ग उ. घृतन्ते. . . ; ख उ. * * मनुरज्या * (मा. समाधे) ।
घ उ. * * द्रह्रते (ज, म. द्रहुते) * अग्रे (मा. अश्रे) ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ मय्यग्ने अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन ।
मयि प्रजां मय्यायुर्दधामि स्वाहा मय्यग्निः ॥३॥

८३.१ अप्सु ते राजन् वरुण गृहो मितो हिरण्ययः ।
ततो धृतव्रतो राजा सर्वा धामानि नो मुचेः ॥४॥

२कख धाम्नोधाम्नो राजन्नितो वरुण नो मुचेः ॥५॥

८३.२ग-ङ यदापो अघ्न्या इति वरुणेति यदूचिम ।
ततो वरुण नो मुचेः ॥६॥

८७.१ यो रुद्रो अग्नौ यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश ।
य इमा विश्वा भुवनानि चाकॢपे तस्मै रुद्राय नमो
अस्त्वद्य ॥७॥

---

३ का. मय्यग्ने * * स * * * । * * मय्याद्दधामि * घ म. . . मय्याग्निः। मर्यग्निंः॥
गघ मा. * * मय्यायु . . . * मज्यग्निः ।
४ का. . . . वरुणा गुहामितोमितो * ।. . . धामा वि नो मुच्चे ।
ख म. . ऽमितो * । ग मा. राजान् ;
५ का. . . . राजन्यतोरुवण * मुञ्च ।
म. * राजंनितो * * * ॥ ४घ, ५क < दामानि, दाम्नोदाम्नो।
६ का. . यति वरुणेन यदुचिम. . मुञ्च । ख मा. . यदुचिम ।
७ खग का. यीं. . . रुधाविवेष । . . . चक्लुपे;
क मा. * * ऽ ग्नौ * प्स्वन्त- (= म.);
ज. * * अ (→ ऽ) ग्नौ * अप्सुन्त-;
गघ मा. * * * भवनानिचाक्लुपे. . . * स्त्वद्य ॥
ग ज. . . . चाक्लु (?) पे;
द्र. का. सस्वरपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८८.१ अपेह्यरिरस्यरिर्वा असि ।
विषे विषमपृक्था अहिमेवाभ्यपेहि तं जहि ॥८॥

६३.१ पृतनाजितं सहमानमग्निमुग्रं हुवेम परमात् सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवो अति
दुरितान्यग्निः ॥९॥

६६.१ यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु ।
यदश्रवं(<वन्) पशव उद्यमानं तद् ब्राह्मणं
पुनरस्मानुपैतु ॥१०॥

२०.३४

शौ.७.६९.१ शं मा वातो अभि वातु शं मे तपतु सूर्यः ।
अहानि शं भवन्तु मे शं रात्री प्रति धीयतां शमुषा मे
व्युच्छतु+ ॥१॥

---

८ का. अपेह्यरिरिस्यरिरिर्वासि विष. . मप्रशक्तां विष वा प्रषि * जजि।
९ का. . . . मुग्र * परमस् * । . . . विश्वा क्षामाद् * धि. . . भ्यग्निः।
ख मा. . . . सधस्तात् (= ना)। म. . . . हुवम * * । ग उ. * * * *
विश्वहा;
घ मा. क्षामन्दे. . . दुरितांन्यग्निः ॥ ज. क्षामद्दे × अति . . . ॥
१० का. . रिक्षं * वि रजांसि तत वृक्षेषु भयरलपेषु। अजस्रवं. . . z३z
क मा, म. * * * आसं;
गघ मा.यद्यश्रवं * * * व्राणं. . . नुपेति ॥३३॥ द्र. क आसं इति लेखन दोषः।
ज. . . . नुपैति ॥ऋ ०।३३। म. त्रुपेति ॥३३।ऋ १०॥
२०.३४.१ कख का. * * * भिवाते * * तपति * ; ङ का. शं (मु → मू) षा * यश्छतु। मा. शमुशा. . . ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तिष्टत पितरो ये पुरा स्थन यमं राजानमवसानमर्चत।
अयं नृणां नृतमः श्रेष्ठ आगन् तस्मै लोकं कृणुत
यावत्सबन्धु ॥२॥

यस्येदं शस्तं प्रतिमाकृतं देवैर्दत्तमनुसूर्यं च संभृतम् ।
गघ १२.२.२९ गघ त्रिः सप्त कृत्व ऋषयः परेता मृत्युं प्रत्यु(<त्यौ)हन्
पदयोपनेन ॥३॥

९६.१ अगमन् गावः सदनमपप्तद्+ वसतिं +वयः ।
आस्थाने पर्वता अस्थुः स्थामन् वृक्कावरीरमम् ॥४॥

× आ गावो गोष्ठमगमन्नाग्निधानान्यग्नयः ।
आ वृक्कौ समप+त्सातामुत्सक्तभेषजमसि ॥५॥

---

२ का. . . ष्ठत् * * पुरास्मदनिसं. . . वशानमर्चतः अय * नृतयश् श्रेष्ठागं * कृणुता. . बन्धः;
कख मा. उत्तिष्ठति * * पुरस्तान्. . . मर्च्चित । ग मा, ज. * नृणा. . .;
३ का. . शस्यं . . कृदेवैर्दत्तमनुसूर्यं * सम्भृताम् * * कृद् * * * प्रत्यूहं. .।
खग मा. दैवैर्दत्तमसूर्यञ्च (= उ) * । तः तू. . . ;
घ मा * प्रत्युन्तहन * ।
४ का. अगमं * . . . मप्तद् * नय । * * स्ववस्थानेयनृकावरीरिमम् । द्र. का न-वयोर्विपर्यासबाहुल्यमूलः शोधः नयः → वयः ।
मा. अगमन. . . मगमद्(उ) * पयः (= उ)। * * अस्थः स्थामन. . . वरुरमन् ॥
५ क-ग का. * रवो अग्मंनाग्निधान्यग्नयः * * . . भित्शाता-;
ग-घ उ. * * स(मा. सा) मवत्सातामु . . . ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१.२.४ यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम् ।
एवा रोगं चास्रावं च मुञ्जस्तिष्ठत्यन्तरा ॥६॥

अस्थादिदं विश्वं भुवनमस्थाद् वातो वनच्यवः ।
गघ ६.४४.१[गघ] अस्थुर्वृक्षा ऊर्ध्वस्वप्नास्तिष्ठाद् रोगो अयन्तव ॥७॥

कख घङ६.४४.२ शतं यद् भेषजानि ते सहस्रं संभृतानि च ।
ग२.३.२[ग] तेषामसि त्वमुत्तमं +श्रेष्ठमास्रावभेषजं
+वसिष्ठं रोगनाशनम् ॥८॥

७.९७.१ यदद्य त्वा प्रयति यज्ञे अस्मिन् होतश्चिकित्वन् निमृणी-
ऋ.३.२९.१६ महीह ।
ध्रुवमयो ध्रुवमुदा शमिष्ठ प्रजानन् विद्वान् उप याहि
सोमम् ॥९॥

---

६ क का सा. अ. । खगौ पतितौ । घ मुञ्जत्तिष्ठ. . ;
कख मा. * द्यञ्च (ज. द्याञ्च) * श्चान्त. . . त्रेजनं ।
ग उ. . . . ञ्चाश्रावञ्च; घ ज. मुंज. . . ॥
७ का. कख. . . . वाचो अनुस्यवः; गघ सा. अ ।
मा. आस्थादिवं (. . . दिवं-ज). . . वृक्षा उर्द्ध्व. . . अयन्तवं ।
गघ म, ज. . . . ऊर्द्ध्वः स्वप्ना. . . ॥
८ ग-ङ का. . . न्वमुत्तममनास्रावसरोगणम् । वसिष्ठ * ।
ख मा. सहश्रं * * । ङ मा. श्रेष्ठतमाश्राव * ; ङ उ. वशिष्ठं *।
९ ख-घ का अस्मि. . कित्वा नृम्णीमहीयः । * ध्रुवमदरसि विसिष्ट * विद्वा *
* * ;
क मा. . प्रयतु * * ; म. . ऽस्मिन्; ख उ. . श्चिकित्वं; . . ।
ग मा, म. धृव. . धृव. . . ; मा. . . . स → शमष्ठ
घ ज. * विद्वानुप * * ।
मन्त्रोऽयमथर्ववेदे नष्टः। खग ८ * अवृणीमहीह। ध्रुवमया(:)
ध्रुवमुताशमिष्ठाः; नार्टेन् १९६४ : २५४[३९१], ह्विट्नी १९०५ :
४५८ द्र।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२ समिन्द्र नो मनसा नेष गोभिः सं सूरिभिर्हरिवं सं स्वस्त्या।
ऋ.५.४२.४ सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमत्या
यज्ञियानाम् ॥१०॥

२०.३५

शौ.६.५३.३ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
पै.१९.८.३ त्वष्टा सुदत्रो वरिवः कृणोत्वनु नस्ताष्टुं तन्वो
विरिष्टम् ॥१॥

कौ.६.९ संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः।
इमं यज्ञमभि विश्वे गृणन्तः स्वाहा देवा
अमृता मादयन्ताम् ॥२॥

शौ.७.९७.३ यानावह उशतो देव देवांस्तान् प्रेरय पुनरग्ने स्वे सधस्थे।
जक्षिवांसः पपिवांसो *मधून्यस्मै धत्त वसवो वसूनि ॥३॥

---

१० कख का. समिन्द्रा णो (= ऋ.) मेवसा नेषि * सँ. . . र्हविरे
ख मा. * सुरभि (= उ). . . स्वस्ति ।
घ म. * देवा * यज्ञानां (= ज) ॥ ३४॥ऋ॥
द्र. का. ९-१० मन्त्रौ सस्वरौ ।
२०.३४.१ का. सं वर्चसे इत्येका । मा सवर्च्चसत्येका ॥
ज, म. सं वर्च्चसेत्येका ॥
२ क-ग का. सैं. . . स्थविषव. . . षादस्व. . . गृणन्ध;
मा. . . . स्तविष्ठा. . . यज्ञंमभि * गृणन्त;
घ ज. . . . मादयंतां ॥
३ का. * उषतो * देवांतान्. . . । जक्षिवासष्पपिवाँसो वादन्यस्मे. . .;
गघं उ. यक्षि. . . वधून्यस्मै * * *।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयन्नो यज्ञो अप्येतु देवानुत्तरां वेदिमप्येतु वेदिः ।
वि मुञ्चाम्यृत्विजो दक्षिणाभिर्देवा यक्षीष्ट
पुनरुत्तरावत् ॥४॥

९७.५ यज्ञ यज्ञं गच्छ+ यज्ञपतिं गच्छ+ ।
स्वां योनिं गच्छ स्वाहा ॥५॥

६ एष ते यज्ञो यजमानः सहसूक्तनमोवाकः ।
सुवीरः स्वाहा ॥६॥

८ मनसस्पत इमं देव यज्ञम् ।
स्वाहा वाचि स्वाहा वाचे धाः स्वाहा ॥७॥

७ स्वाहा हुतेभ्यो +वषड् हुतेभ्यः ।
देवा गातुविदो गातुं मित्वा(<वित्त्वा*)गातुमित
स्वाहा ॥८॥

---

४ का. . . . ज्ञोमप्येतु देवां सन्तुरां. . . येंभिः विमुञ्चमृत्विज्ञो दणाभि
. . यज्ञैश्च पुनर्मत्वदावत्। द्र. यजेः सिचि व्यत्ययेन सक् चेट् च ।
= Precative.

घ मा. * * पुनउत्तरावृत् । ना. * यक्षिष्ट * ॥

५ का. सा. अ. । क मा. यज्ञं * * ;

६ का * * * * स्वाहा । सूक्त. . . सुवीर * ।

ग म. सुवीर * ॥
यथा पूर्वमन्त्रे तथात्रापि यज्ञः सम्बोधितः।

७ का. यनस्यत इमन् * * * । वाचे * वाचये * * ।

क म. मनस्पत. . . ;
द्र. मा. ६-७ मन्त्रौ विपरीतक्रमौ। शौ. . . वातें धां स्वाहां॥ 'वाचे'
अपि युज्यते।

८ का. स्वा * वषुढूतेभ्यः * . . विधो * नत्वा. . विदस् * ॥

कख मा. * हुतेभ्या वषट् (= उ)*। ग ज. . . . गातु *; घ उ. गातुमितः *।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७.९८.१ सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुभिः सं मरुद्भिः।
सं देवेभिर्विश्वदेवेभिरक्तमिन्द्रं गच्छ^क^ति यत् स्वाहा॥९॥

१४.१.४२ आशासाना सौमनसं प्रजां चक्षुरथो बलम् ।
इन्द्राण्या अनु व्रतं सं नह्ये अमृताय कम् ॥१०॥

२०.३६

मै.३.८.४ इन्द्राणी नारी सुभगा सुपत्न्युदंशेन पतिविद्ये बिभेद ।
काठ.८.१७ त्रिंशद् यस्या जघनं योजनान्युपस्थ इन्द्रं स्थविरं
पिपर्त्ति^क ॥ १॥

काठ.८.१७ सेनासि पृथिवी धनंजया अदितिर्विश्वरूपा सूर्यत्वक् ।
इन्द्राणी प्राषाट् संजयन्ती तस्यै त एना हविषा
विधेम ॥२॥

---

९ का. सम्बर्हिरिक्तं . . . गश्छतियस् * ।
मा. ख संमिन्द्रेण * * * । घ. . . गच्छतु (= उ.) य (= ना) * ।
१० का. आशासानस् * प्रचोबहुरथो * * नु व्रतासनुह्यो * * z५z
क मा. आशीसाना सोमनसं; घ ज. सन्नह्ये * * ॥ म. स * * * ॥
काण्डिकान्ते ऋ १०॥३५॥
२०.३६.१ का. . . . सुपत्नी इदंशेनं . . वित्ते विभेद । त्रियंशुद्धस्याञ्जघनं
योजनांनुपस्थ * * पिन्ति ।
क मा. . सुपन्त्यु; गघ मा. * यसां. . स्थवीरं * ॥ घ उ. . पिपर्त्तु ॥
२ का. सगासि * * ग्निविश्वरूपस् * ।. . . तेनाय * * ।
घ मा. तस्वै तयेना * *॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अजिरोत्तिष्ठन्त्यु*त्थिताग्रेत्वरी प्राषाट् तूर्तमुपचरन्तीम्।
प्राषाट् कस्त्वैषो*ऽग्रेत्वरि कस्त्वै*ष मयि* सत्वा भद्रे ॥३॥

शौ.७.१००.१ पर्यावर्ते दुःस्वप्न्यात् पापात् स्वप्नादभूत्याः ।
ब्रह्माहमन्तरं कृण्वे परा स्वप्नमुखाः शुचः ॥४॥

१०१.१ यत् स्वप्ने अन्नमश्नामि न प्रातरधिगम्यते ॥
सर्वं तदस्तु नः शिवं नहि तद् दृश्यते दिवा ॥५॥

॥ इति षष्ठोऽनुवाकः ॥

---

३ का. अधरोत्तिष्ठंत्युन्थिदाग्नी. . प्राषट्थन्तमभिजयन्ती । प्राषद् त्व स्त्वरिषस्त्वाग्रे प्रैष प्रैषस्त्वर्षस्त्वा *।
मा. . . . ष्ठंत्यु(=उ)त्थताग्रेत्वरीप्राषाद्तूर्त्तमुपचरन्तीं।
कस्त्वयि(=उ.)षोग्रेत्वरि कस्त्वयि(=उ.)ष मयि सत्वाय *।
म. पुस्तिकायां ग ग्रे इत्यतःपरं पादचिह्नम्। घ < कस्त्वैष मैष* त्वा भद्रे?
द्र. पुस्तिकापाठा भूयः अशुद्धाः। अस्मत्कृतशोधोपि चिन्त्यः।

४ का. . . वन्तय दुष्वप्न्य. . . दभूत्या । ब्रह्माहामेतरकृण्व *. . मुखा सुव।
क म. * दुःष्वप्न्या;

५ क का. * * अन्नं अश्नांति; घ का. * धृतेदिवा z६z इति विंशातिकाण्डे षष्ठोन्नुवाकस्समामाप्ताः z
क मा. * * . . मस्यामि; गघ मा. श (म स) र्वन्तदस्त * * . . . दृस्यते * ॥३६॥
काण्डिकान्ते मा.॥ ३६॥ जं.ऋ ५॥३६॥ इत्येकर्च्चकाण्डे षष्ठोऽनुवाकः ॥अ६॥ म. ३६॥ऋ५॥अ६॥५५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.३७

मै.४.११.१ विश्वं विव्यज्मि पृथिवीव पुष्टमायदादाय+
प्रति गृह्णाम्यन्नम् ।
वैश्वानरस्य महतो महिम्ना स्योनमस्मभ्यं मधुमत्
कृणोतु ॥१॥

त्रिशृङ्गमसि दुरभिधर्षमिन्द्राय ध्रियसे ।
पूषा ते प्राशिता ॥२॥

पाहि नो अग्ने तन्वं पाहि गाः पाहि यत् तनूकृतम् ।
अहुतादावमर्त्यौ+ तावस्मान् पातो अंहसः ॥३॥

यो(<यौ)देवानामहुतादावमर्त्यौ+ स्वर्भानुश्च स्वर्ज्योतिश्च॥
तयोस्त्वास्येन प्राश्नाम्यग्नेष्ट्वा वैश्वानरस्य त्वास्येन
प्राश्नामि ॥४॥

२०.३७.१ कख का. * विवज्मि. . . मायदायतु * . . . . ; द्र. क विव्यज्मि। छान्दसप्रथनार्थकव्यचेः श्लुविकरणस्य व्यज्। अयं पैपलादसंहितालभ्यः। तु. पै. २.२८.१ विश्वं विव्यज्मि पृथिवीव पुष्टम्। वै. तु. मै. सं. ४.११.१(२२)विश्वं' विव्याच पृथिवीव .पुष्टम्; ख पाठः संशयितः। मै. अन्यमन्यत् प्रतिगृभ्णात्यायत्। पै. पुष्टमिति प्रथमपादावसानेऽपि वाक्यं द्वितीयपादान्त एवावसितम्, तेन तदेवादानकर्म।

२ का. . . . द्रव्यधर्षि. . . ध्रीयते। * * प्राशितष्;
द्र. प्र. ग नास्ति।

३ का. प्राहि. . गाध्राश्वानो कृतम् । . . . मृत्यो दावस्मान् पातुमँहस;
ख मा. . . . तनुकृतं । ग उ. . . वमर्त्तौ;

४ कख का. . . . बहुतादायसृन्धु स्स्वर्भा. . . ।
मा. * . . . दावर्त्तौ. . . स्वर्योतिश्च । क म, ज, ना. . . . दामर्त्तौ;
गघ द्र. पादविभागः ११+११ ज-मात्रलभ्यः त्रुटितश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षश्च त्वा मानसः प्राश्नीतां स्वर्भानुश्च मारुतः ।
मा पृणत् पूर्त्या वि राधि मो वयं प्रजया धनेन ॥५॥

अनाधृष्यस्य ते पितो अनाधृष्यशवसः ।
सर्ववीराः सर्वात्मानो भक्षं क्रियास्म ॥६॥

कामो मे राज्ञि प्र विवेश त्वां तमहं निर्ह्वये* पुनः ।
गृहेषु गोषु मे मनो अक्ष्योरस्तु मे भगो जिह्वायामस्तु मे रसो
बाह्वोरस्तु मे बलमूर्वोरस्तु मे जवः ॥७॥

ख शौ.२.३.५ख दिवोसि निर्मथितं पृथिव्या अध्युद्भृतम् ।
समुद्राद्दुच्यसे जातमक्ष्यामयभेषजमस्याथर्वणम् ॥८॥

पूषा परस्तादावर्तयतु+ चतस्रो भूम्या दिशः ।
सगलिक पुषलिक पुनर्नो नष्टमायति
जीवेन +भुनजामहै ॥९॥

---

५ क-ग का. . . . श्चि. . . सा प्रिणं पूर्त्वा विराज;
६ का. आना. . . तोरनाधिष्ठशूशवसा । स्वर्ववीरास्. . . क्रियास्माः;
ख मा. . . . शवर्च्चाः ।
७ क-घ का. * * राज्ञ * * * चमाज्वंत्वरायति । . . अक्षौ मे रस्तु * * जिह्वा
मे स्तु * * ; द्र. का. ख २०.२८.२ख; शौ. १३.१.५८ख
मा. * * राज्ञा (ज. राज्ञी → ज्ञि). . अक्षोरस्तु (= म, ना) . . जव॥
द्र. क उ. विवेश इति पादावसानम्। ख निरुह्वये * ।
८ ख-घ का. पृथिव्याद्यादभ्यतम् । . . . मक्षावय. . . ।
कख मा. . . . थितं । . . . अध्युभृतं ।
गघ ज. * * . . मछ्यक्षामयभेषजम. . . ॥
९ का. . . . वर्तयातु * * उत । सगलिग पूषलिग. . स्रो. . . कृधि ।
* भिनुजावही ।
क उ. पुरस्तादार्वतय; स्तामा. षूषापुर इत्यावर्तितम् ।
ग म. * पुस लिक ; ङ म, ज. * भुन्जामहै (मा. भुनज्ञामहै)॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदाभरच्छृतदग्नि (च्चृतदग्निस्?) स्तेजने नष्टवेदनम् ।
खर्गलेव पुनर्दत्तं पुनरस्मा (अ)श्विना नष्टमाजतम् ॥१०॥

२०.३८

यद्यस्यप्रियजा यदि वान्यत आभृतम् ।
विसल्पकस्य भेषजीर्देवीराप[1] इमा मम ॥१॥

वयस्य पूतिकस्य द्रुशाम्बस्योत गर्मुतः ।
तेषां समग्रभं शुष्ममाशूनां धावतामिव ॥२॥

यस्तनुः पृथुर्वीणा वध इव प्रसर्पति ।
मयूरः किल ते विषं कृकवाकुश्च जक्षतु ॥३॥

---

१० का. अनाभरत् सृजदग्नितेजने * खर्गलेपुनन्दहं. . . मष्टमाजतम् zzz१z

क मा. यदा भूतच्छृत. . ; ज. . . . त्सु → श्रृतदग्नि; द्र. कख अन्वयः अर्थश्च पाठश्च कष्टम्। यद् अग्निः आभरत् (तत्) तेजने नष्टवेदनम् (मणि यद् अ)चृतत् (तेन), इत्यर्थः कल्पितः। चृततेर्बन्धनमिति प्रसिद्धः अर्थः। अडागमाभावः छान्दसः।

घ मा. पुनरष्माष्मिनानप्सुमायतं ॥ म, ज. . रश्माश्विना. . मायतं ॥ काण्डिकान्ते ज. ॥ऋ१०॥३७॥ म. ३७ ॥ऋ॥

२०.३८.१ ख-घ का. . . न्यतादृतः . . र्देवराप * म । ग. मा. विषल्पकस्य . . ;

घ उ. - देवीराप * * ॥

२ का. * प्रतीकस्य पगौवस्योथ गुल्मतः तँहि. . . मामूनां. . . मितः;

ख मा. द्रुशाम्वशोत (ज. द्रुशान्व → शांवस्योत) शर्मुतः ।

घ मा. पशूनान्धा. . . ॥ ज, म. माशूना (ज. ना.) न्धा. . . ॥

३ का. यस्त्वनष्. . . वधूरिव सर्पति । पयरष्कृतवे * कृत वागश्चचक्षतु।

कख म. . . . प्रथु. . * * सर्पति । ग उ. * किळ * * ;

घ म. . . . यक्षतु ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदीचीनः प्र तनोति नितत्निर्भूम्यामधि।
ओज्मानं पश्य वीरुधो मिथुना समवीवनत् ॥४॥

नि त्वा तनन् नितत्निना परि त्वागां सहीयसा ।
*श्येनादभिद्रवीयसा सुपर्णान् निकरीयसा ॥५॥

यदत्रापि मधोरहं निरिष्टविषमश्नुतम् ।
अग्निश्च तत् सविता च पुनर्मे जठरे धत्ताम् ॥६॥

अग्ने रुद्रस्य जायासि दुहितासि प्रजापते(:)।
उच्चैःश्लोके दानपत्नि हवि(:)श्रव उप त्वा ह्वय
उप मा ह्वयस्व।
पै. २०.५२.८ नरिष्ठा(<ष्टा) नाम वा असि ॥७॥

---

४ का. * पृतनति. . . । . . . वीरुवीरुधो * समजीगमत् ।
क मा. उदीचीनं * * ;
५ का. नत्वा चरक्षितलुना सपत्ना सा गह्रीयसा । सेवादधतावीर्यसा सुवर्णानु गर्यसा। क <* * तनं *?
ग म. शेनादभि. . . ; मा, ज, ना. सेनादभि . .; घ मा. सुपर्ण्णा. . . यसी ॥ द्र. ग < श्येनादपि ?
६ का. . . . स्त्रापि सधो. . निरिष्टमधिनिष्कृतम् अग्निष्टित्स्थ(? त्स्थु Barret; त्स्थ - मुम्ब) वितादं पुनरग्ने जठने धत्रा (→ ता) म्;
घ मा. . . . धतां। द्र. का. उ. पाठयोः भूयः प्रभेदात्मूलपाठः न निश्चयेन निर्णेतुं शक्यम्। "यदत्रापि मधोरहन्यरिष्टमधि निष्कृतम्। अग्निश्च तत् . . ." इत्यादिः शोधः कल्पयितुं शक्यते। अन्तिमाक्षरयोरानुष्टुभो लघुगुरुक्रमो बाधितः।
७ का. . जहामि. . । उश्चैश्श्लोकं दारुपत्ना ह्वयसूप * * । * * वासि। ग मा. उच्चैश्लोके दानपत्नी; म. उच्चैःश्लोको * * ; ज. * दानपत्नि → त्नी * ; द्र. ङ. नरिष्ठा। एवं मा. सं. ३०.६। <नरिष्टा।
घ,ङ मा. . . . ह्वयस्व ॥. . . असि ॥[१]। ज, म. . . . असि ॥[२]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथासौ हरिणो वृषा कुलादधि प्रस्कन्दति ।
एवा नि ष्कन्द पित्र्याद् भगं जयन्ती धनं जयन्ती ॥८॥

रिज्वस्या (<ऋजिश्वा?)मह्यमब्रवीत् गन्धर्वस्यानुशासनम्।
एतत् ते पतिवेदनम् ॥९॥

पाटा भिनत्तु कुम्भं पाटा कुम्भीं गदोहनीम्।
पाटा सर्वस्य पात्रस्य वधूं कुणोतु विश्वतः ॥१०॥

२०.३९

अपेहि तक्मंश्चर परो अन्यमस्मदिच्छ+ पुरुषं कञ्चिदेव।
वेद ते तक्मन्* पितरं वेद मातरम् ॥१॥

शमीवानसि शामीवतः शमीवानाभिशोकिः ।
अभिशोको हार्षणिर्हर्षणो +जञ्जभिः ॥२॥

---

८ का. . . . वृका । उलादधि प्र प्र * यवा निस्कन्ददि पित्याद् * जयती धनञ्जयन्ती । ख म, ज. . कूलादधि * * । ना. कूदधि . .। ग मा. * निस्कन्द पित्त्या (=उ.);

९ का का. ह्वदिश्वा. . . ; ना, ज, म. रिज्यस्या; ग का. एत * *

१० का. पटा (पर्णा Barret) (→ र्या) भिनत्यकुम्भी पटा (पर्णा Barret)* स्वदोहिणीम् । पर्णा * * विधिं * * ; z२z

ख मा. * कुम्भी * (= ना)। म, ज. . खदोहनीं॥ ५.९.५ख द्र.। घ मा. स्या वधं * * ॥३८॥

घ ज. . . . विधं → वधूं * * ॥ऋ १०॥३८॥
म. . . . ॥३८। ऋ१०।

२०.३९.१ का. अपीहि तक्मँ. . * न्यमिश्छदिश्छ * किञ्वदैवः * * तक्मँ. . ;

ख मा. . . . दित्स * किं. . .। ज. . . . किञ्वदेव । ग उ. * * तक्मं*;

२ का. . . वान्यशसामीति. . . शोकि। * हरिरुषणि हरिरुषणोट जंजभि।

घ उ. . . जांजभिः॥ द्र. इतोऽन्यत्र समीवत्-शामीवतशब्दौ पाणिनीयगणपाठ (४.२.८६,५.३.११८) एव लभ्यौ। घ जञ्जभिः। यङ्ङ्गात् इ। तु सासहिः।

ग मा. . . . कोत्पर्षणी - ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यः पशूनां मार्जनीयो यं त्वमंशेन भेजिषे ।
अभीहि तक्मन् गर्दभं न मामभ्येतुमर्हसि ॥३॥

विस्रसा नाम ते माता किंकिशो (<किष्किषो*?) नाम
ते पिता ।
शिमिदा नाम ते स्वसा ॥४॥

[कख]१२.१.९[कख] गिरिं [+]गच्छ गिरिजा असि गिरौ ते माहिषो गृहः ।
दासी चक्रमास्थाय नाम्लाते नि क्रन्दयिष्यति ॥५॥

आ वातो वात्वनघः सर्वस्य दूतो अभिशस्तिपाः[+] ।
जलाषमित् प्र सिञ्चति तद् विषस्याप सिञ्चतु॥६॥

---

३ का. यष् * * यन्तुमवदेन * । अनीहतं भं * स. . . ।
खा मा. * त्वमशेन * । ग मा, म. अभिहि. . ; ज, म. . तक्मन *;
घ उ. . . . तिमर्हंति ॥
४ का. विस्रसा (××) । द्र. काश्मीरीये शेषो नास्ति ।
क मा. विश्वि(→ श्व)शा. . .; ज. ना. विश्विशा. . .; म. विश्वशा . . .;
ग मा. शमिदा. . . ;
द्र. क विस्रसा = जर्जरत्वम्।
५ का. (×××) युशो ग्रहः * . . मास्थां अनास्नाते निष्क्रन्द . . . ॥ ॥
क उ. गछ. .;
घ मा. . . . निक्रन्य → न्दइष्यति ॥ ज. . . . निक्रन्दइष्यति ॥
म. निक्रन्यइष्यति। गघ म. ना इति पादः, ज. य इति।
६ का. अ अ. . . भिशस्तिपात् किलासमभि षिञ्चतु धत्रैतमुप सिञ्चतु।
क मा. * * वात्वनप; म. . . वाहनघः;
ख मा. . शस्त्यायाः । ज, म. . शस्तियाः । ग मा. जलासमि * * ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यामस्यति पृश्निबाहुरिष्टं हरिद्रुपर्ण्यम् ।
तामस्य निष्खिदामसि यथा जीवासि भद्रया ॥७॥

शौ.१९.२५.१ अश्रान्तस्य त्वा मनसा युनज्मि प्रथमस्य च ।
†उत्कूलमुद्वहो भवोदुह्य प्रति धावतात् ॥८॥

एतं दन्तं निर्ऋत्या घोरमाहुर्यस्त आसन्नवरूढ एषः ।
तं दुहर्दि प्र हिणोमि घोरं *स नो मा* हिंसीज्*
ज्यायसो मा कनीयसः ॥९॥

शिवः शग्मो भवतु दन्त एष मा नो हिंसी(ज्) ज्यायसो
मा कनीयसः
अघमारमघशंसं निर्ऋथं तन्ते दन्तः सचतां घोर
एषः ॥१०॥

---

७ का. यमस्य. . . वृषं हर उरपर्ण्यम्. . . निष्य. . . ।
ख म. . पर्ण्णं । मा, ज. . . . पर्ण्णंघं । ग मा. . निस्मिदा. . ;
द्र. कख . . . पृश्निबाहुरिष्यिन् हरिद्रुपर्ण्यम् इति शोधश्चिन्त्यः। हरिद्रुपर्णी वृक्षविशेषजातपत्रं वा लताविशेषो वा। द्र. AiG III. 196; पा.ग.पा. ४.४.५३.

८ का. आशांतस्य मनसा दुह्यत् प्रति धावतः यदकूल . . . दुह्यत् पृतन्यतः;
ग उ. उत्कुळ. . . ;

९ का. वेदन्तं. . . इर्यास्या कं निरुरूढपकः तन्सुहान्दे. . . मनोसा हिंसीर्ज्या. . . ;
क मा. * दत्तं * . . . ; ख मा. . . . रुढ * । म. . . . न्नत्वरूढ * ।
ग म. * दुहादे. . . ; घ उ. मानोहिसी . . .॥

१० का. * शगो * व्रह्म से । ममातो मा हिसीर्ज्यायसो * * शिवशग्मो भवतु व्रह्म सो ममातो मा हिसीर्ज्यायसो मा कनीयसः अपमार. . . निर्ऋतं. . दन्त सजतां * एकः अघमारमघशंसं निर्ऋतं z३z
क मा. * * * दंत्त * ;
घ मा. तत्ते * * * एष ॥३९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.४०

अघमारमघशंसं निर्ऋथं द्रुहर्दि दन्तं प्र हिणोमि घोरम्।
सो अस्यात्तु द्विपदश्चतुष्पदः शिवो अस्मभ्यं सुमना
अस्त्वेषः ॥१॥

शिवन्ते दन्तं हविषा कृणोमि शिवो मह्यं कुर्वते दन्तो अस्तु।
शिवानि ते त्रीणि त्रिकद्रुकाणि सन्तु शिवो मह्यं नभसी रोदसी
स्ताम् ॥२॥

पुरुरूपा पृथुपेशा अरंकृद्[+] वहतोरसि ।
प्रतिष्ठासि चतुष्पदां यस्त एष पञ्चमः पाद-
स्तन्तेन प्रति गृह्णामि ॥३॥

ऋ.३.५३.१५ ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥४॥

१६ ससर्परीरभरत् तूयमेभ्योधि श्रवः पाञ्चजन्यासु कृष्टिषु।
सा पक्षिया (=पक्ष्या)नव्य*मायुर्दधाना यां मे
पुलस्तिजमदग्नयो ददुः ॥५॥

२०.४० द्र. काश्मीरीये ग्रन्थे केवलं १क पादः अस्ति। निर्ऋतं इति पाठस्तत्र।

२०.४०.१ खग मा. दत्तं. . . । * अस्याद्व. . . ; घ म. * स्मभ्यं. . . ॥

२ क मा. . . . दत्तं * * ; ग मा. * * त्रिणि. . . द्रुकाणि (= उ.) * ;

३ मा. * प्रृथुपेशा अरंकृद्द (= ज) हतोरसि ।. . . स्तत्तेन * * ॥

ख म. अरंकद्वहतो. . ।

ङ ज. . . . गृकृणामि ॥

४ क मा. सर्परी. . . ; ख ज, म. वृहन्मीमाय; मा. . . . यमदग्नि(= ज.) दत्तां; घ उ. . मदुर्यं ॥

५ क मा. . . . भरर्तूय; ख म. . . . कृष्टषु ।

ग उ. * * नभ्य . . .; घ मा. या. . . यमदग्नयो (= ज) विदुः॥ ऋ. * * पलस्ति . . .॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अघ्न्ये †दूरमूत् कन्द नि पदश्चतुरो जहि ।
अधा गोदुहः शीर्षणि शफां उरसि वादय ॥६॥

शृङ्गाभ्यामुप स्रष्टारं पदावर्तय गोदुहम् ।
अथो ये अन्ये तिष्ठन्ति तान् विषूचो वि नाशय ॥७॥

यथा नर्ता सक्षिकाजिं नि कुल्फमभि नृत्यति ।
एवा त्वमघ्न्ये पदः सर्वान् साकमुदर्दय ॥८॥

उद्ध क्षीरमुत्तभितं स्यन्दन्तामस्य धेनवः ।
असृक्तस्य गवो द्रुह्वां यो अस्मान् *नापचायति ॥९॥

ऋक्षीकाया यथा मनो व्याघ्रस्य यथा मनः ।
एवा तस्य गवां मनो यो अस्मान् *नापचायति ॥१०॥

२०.४१

क शौ.६.१५.१[क] उत्तमोस्योषधीनां वीरुधां बलवत्तमः ।
ख ५.४.१[ख] सस्यन्दन त्वमोषधे *सर्वाः स्यन्दय गा इमाः ॥१॥

---

६ क मा, ज. * ये दु (← दू ज.)र . . .; म. * दुर . . .;
महाभाष्य ८.४.६१ अघ्न्ये दूरमुत् कन्देति ।
ग मा. * * शीर्षणा; घ मा. शफा * * .
७ क मा. . . . श्रष्ठारं; ज. . श्रष्टारं; घ मा. * विशुचो * * ॥
८ क मा. * * सखिकाजिं; ग म. * त्वमग्न्ये;
९ मा. स्यंन्यत्तामस्य * । म. स्यन्दंतामस्य * । ग मा. . दुहां;
९,१० घ उ. * * नापचा इति ॥
२०.४१.१ ख का. सा. अ. । गघ. का नास्ति ।
क ज. . . . अस्योषधीनां;
ग ज. . . . सस्यं (न्ध →) दन. . . ; घ उ. सर्वा * * * ॥
घ प्रायिकोऽयं संयोगादिसकारपरविसर्गस्य लोपः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अरन्तु रथन्तु ।
१८.२.३६गघ वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः+ ॥२॥

अकृदश्वो अकृत् खरो अकृदश्वतरो हरिः ।
एवासि+ बह्वघे तव भसन्नदत्वासिचा+ ॥३॥

—यथा नदति गर्दभ एवा नदति+ ते भसत् ।
व्रीहेर्यवस्य माषस्यैतत् पश्याभिदर्शनम् ॥४॥

उद्धरे द्यावापृथिवी उदाप उदग्निमुदिन्द्र-
मुत् सूर्यमुद्रात्रिमुदहः ॥५॥

---

२ का. रथन्तुमनेक शुष्मास्तु ते । . . . यध्वरः;
क मा. अरभु. . . ॥ अयं प्रथममन्त्रस्य पञ्चमपादत्वेन संकेतितः ।
ग मा. यद्धर । ज, म. . . . यद्वरः ।
३ का. अकृतश्श्वो अकृत * अकृत. . . * यथासिबह्निके तव भसं वदत्वासृजत्;
कख मा. . दश्यो. . अकृदश्य. . ॥
ग ज. एवासुवह्या. . ; म. एवासुवद्याघे * ;
घ मा. रसन्नद. . . ॥ उ. . . दत्वाशिता ॥
४ क-ग का. * नुदति गर्दभो यथा नुदति * *। व्रीहीर्यवस्यमाषस्य हृदि पश्यामि दर्शनम्; क मा. * नन्दति गर्दभं. . . ;
ख मा, म. * नन्दंति * * ॥ ज. * नन्दन्ति . . .। ते इति षष्ठ्यन्तं रूपम्। लेखकस्य १। बहु. इति भ्रान्तिः।
गघ मा. व्रीहें. . . दर्शनं ॥
५ का. * भरो * मुदिन्द्रमुत्सार्यमुद्राचमुदाह ।
ग मा. मुच्छूर्य. . . मूदह ॥१ म. मुच्छूर्य. . . हः ॥१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शौ. ७.१०२.१ नमस्कृत्य द्यावापृथिवीभ्यामन्तरिक्षाय मृत्यवे ।
मेक्ष्याम्यूर्ध्वस्तिष्ठन् मा मा हिंसिषुरीश्वराः ॥६॥

यन्मेद्वा* यदप्सरसः पयो देवीरहृषत ।
तदिहोप ह्वयामहे चक्षुषे च बलाय च ।
देवानां देवहूत्या मयि त्या देवताः पुनः ॥७॥

यास्य दोषा रसस्य मे त्वं देवि ततर्पिथ ।
नाराशंसेन स्तोमेनाहं त्वत् पुनरा ददे
युष्मदप्सरसस्परि ॥८॥

यन्मे तन्वो रसं वयमुदप्सरसस्परि ।
नाराशंसेन स्तोमेन प्रजामा प्यायामहे ॥९॥

यन्मे पयो विषिषिचे जाग्रतः स्वपतश्च यत् ।
पुनस्तदद्य मे देवा आ सिञ्चन्तु तनू अधि ॥१०॥

---

६ गघ का. अविक्ष्मतौमूर्ध्निस्तिष्ठ * * हंशिपुरीश्वरः z४z
ग मा. मेक्ष्यामुर्द्ध्व. . . ; घ म. . . श्वरा ॥
७ द्र का. ७-१० न सन्ति । द्र. क < यन्मेद्वा/यन्मीद्वा . . .; वनिप्/क्वनिप्। पा. ३.२.७५। ख मा. . . . हृषत् ॥
क उ. यन्मेस्त्वा . . .; गज. . . ह्यायामहे;
च ज. . . . मयित्वा → त्या * * ॥
८ गघ मा. नारासंशंसेन. . नाह त्वं. . . ग्रुष्मादप्स. . . ॥
९ ख मा. वयं; ज. . . मदप्स . . .। घ मा. प्रजामाप्या च यामहे ॥
१० घ मा. * सिञ्व (न्तु →) व * * ॥४१॥ऋ१०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.४२

द्र. ऐ.ब्रा.५.२७.८ यदद्य दुग्धं पृथिवीमसक्त यदोषधीर्व्यसरद्[+] यदापः।
वत्से पयो गवि पयो यदस्मास्तत् (<यदस्यामस्मांस्तत्*)
सचतां पयः ॥१॥

परा पतन्त्याशवोश्वा अधोधुरं यथा।
पै.१९.२०.१२[गघ] एवा मूत्र प्र भिद्यस्व वि वस्तेरास्यं सृज ॥२॥

१३ विषितन्ते वस्तिबिलं समुद्रस्योदधेरिव।
कख शौ.१.३.८[कख]
पै.१.४.४[कख]
गघ शौ.१.३.७[कख] प्र ते भिनद्मि मेहनं वर्त्तं वेशन्त्या हव ॥३॥

तै.स.४.२.५.२ अस्य पारे समुद्रस्य शुक्रं ज्योतिरमर्त्यम्।
काठ.१६.१२ तन्नः पात्वंहसस्तन्नः पातु विश्वतः ॥४॥

२०.४२.१ का. यद्य. . ममुक्त. . र्वसनद्यदापः वत्सं * * * यदस्मास्मत् सृजतां*;
क मा. . समक्तं; ज. . मसज्ज → क्तं; ख उ. . . धीव्यसरद् . . ।
घ मा. . . . सतां * ॥ ऐ.ब्रा, यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरसृपद्यदापः।
पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयि॥
२ खघ का. श्वासदो धुरं यथा । यवा सूत्र * * * वस्त्रेरास्सं सृजद्;
क उ. * पतं (मा. र्तिं) त्वा. . . ; घ मा. दिवस्ते. . . ॥
३ का विषस्तन्तेरस्थिबिलमित्येका।
मा. विसितन्तेविस्तिवलत्येका ॥ म बिषितस्तेवस्तिविलमित्येका ॥
ज. विषितन्तेवस्तिविलमित्येका ॥
४ का यदस्यापारेतसांस * . . . मर्त्य (+म) सनज्म भदति द्विषो (×××) तिरजायत । सनष्पर्षदति द्विषो ग्ने वैश्वानर द्युमत्; द्र. अयं पाठः काठकसदृशः। = यदस्य पारे रजसश्चित्रं (तै. शुक्रं) ज्योतिरजायत। तन्नः पर्षदति द्विषोऽग्ने वैश्वानर द्युमत् (तै. स्वाहा)॥
ख मा. * योति. . . ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्र.तै.आ.१०.४२.१ आ नो मेधा सुमतिर्विश्वरूपा हिरण्यवर्णा जगती जगम्यात्।
सा नो अग्ने मेधा जुषतामिह प्रचेताः ॥५॥

निष्क्रामत्विषिर्यो अत्र प्रविष्टोवयाष्ठश्च* सयुजा
याविह स्तः।
सप्तऋषीणां स्यूमरश्मिः पथैतु स्वान् मृगान् पुनरप्येतु
कृष्णः ॥६॥

सप्तऋषीन् गच्छ+ स्यूमरश्मये मृगान् कृष्णः सचतां वाजो
अश्वम् ।
ईड़ो अस्मान् सुप्रजसः सुवीरान् सह यज्ञेन पयसा
सचातै ॥७॥

नमो अस्त्वृषये* स्यूमरश्मये नमः कृष्णायोत यो वाजो अस्य।
नमो देवायार्वते षुजिष्णवेयं नो वाजी प्र
तिरात्यायुः ॥८॥

---

५ का. * * मेमेधा. . . जगम्या * * ग्रे * द्वि द्विषतामिव प्रचेतः;

६ का. . . र्योत्र प्रविष्टो याष्ठश्च सयुध घृतेन । . . ऋषीनगश्छस्यमरश्मे ते यैतश्वान् *. . . *;

क म. ष्टो इत्यस्याधः ठ इति । ख मा. वयांठश्च * * *। म, ज. वयाठश्च . . .। ना . . . वयांश्च . . .। ग मा. * स्युम(← स्यूर ज) रश्मिः . . .;

द्र. ख <अवयाज् - स्थः च . . .। अवयाज् क्रियाविशेषणम्।

७ का. . . . रस्मे पथैतश्वान्मृगान्वजो * । ईळोस्मान् * सुवीरस् * यज्ञे सजाते ये युद्ध्यन्ते प्रधनेषु शूरासो या तनूत्यजः तास्त्वं सहस्रदक्षिणा तांश्चदेवापि गश्छताम् । (= शौ. १८.२.१७, ऋ १०.१५४.३, पै. १८.६५.१) BHATTACHARYA 2008 (AS) lxvii; द्र.

क म. मृगान् इत्यतः पादसंकेतः । ज. . स्यू → स्युमरश्मये;

ग मा. इड़े; * * *; म, ज. ईड़े. . ;

८ क उ. * अस्त्वर्षये स्यूम (स्युम-त) . . .;

द्र का. ८-९ न स्तः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अति यन्त्यहान्यति रात्रीरत्युषसः ।
आपो अन्तर्धावरीस्ताभिरन्तर्दधे त्वा ॥९॥

यथा+ नैदाघ्ये+ मासि वह्वीः शुष्यन्त्योषधीः ।
एवा प्र शुष्य मामनु यच्च पश्यामि यच्च न ॥१०॥

द्र.७.१२.९ पाटा बिभर्त्यङ्कुशं हिरण्यवन्तमङ्किनम् ।
तेनाहमन्येषां स्त्रिय (<श्रियः) आ लुम्पामि ममेदसन्* ॥११॥

॥ इति सप्तमोनुवाकः ॥

२०.४३

शौ. १९.७०.१ इन्द्र जीव सूर्य जीव देवा जीवा जीव्यासमहम् ।
पै. १९.५५.१२ सर्वमायुर्जीव्यासम् ॥१॥

---

९ ग मा. * अन्तर्वावरी-;

१० का. * नीदाघ्ये * बह्वी प्रशिष्यंत्वोषधी । यवा * * सामनि यश्च पश्यश्च यश्च * ॥

क मा * नैवा → दाघ्ये *; ज. नैदा → वाघ्ये * ; म. * नैदाघ्ये *;

ख मा. * शुष्मोन्त्वोषधीः । ज. * * शुष्व → ष्मन्त्वो. . . । म. * शुष्यन्त्यो → न्त्वोषधीः ।

द्र. क नैदाघ्ये < नैदाघे?

११ का. . . तेना सपत्न्यावर्च * * ममेधसम् z५z इत्यथर्वणि विशतिकाण्डे सप्तमोनुवाकस्समाप्तः zz

क मा. * विभर्त्यकुंशं; ज, म. र्त्यंकुशं;

ख मा. . . . मंकिंनं । ज, म. . . . मंकिनं ।

ग मा. . . . न्येशां *;

घ मा, म. * लुंपामि. . . ॥ मा. . . . ममेदशून् (अन्ये - दसून्) ॥ ४२॥अ ७॥

पै. काण्डिकान्ते ज. ॥४२॥ऋ११॥अ ७॥ इति एकर्चकाण्डे सप्रमोऽनुवाकः॥

७.१२.९गघ तेन सपत्न्यावर्च * * ममेदसत्॥ का. पाठे तच्छाया।

२०.४३.१ का. (xxx) समाहम्. . . . जिंव्यासम्;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

*अनाभूरस्मि नैतवे तन्त्यां बद्धो दिवि श्रितः ।
आहा त्वा निर्ऋतये ॥२॥

रन्तिरसि रमतिरसि ।
पै.१.६.४ सं श्रुतेन[ख] राधिषीय मा श्रुतेन वि राधिषि ॥३॥

क.शौ.७.८१.४[क] दर्शोसि दर्शतोसि विश्वतः संदृष्टः ।
सोमो असि रुद्रो असि ॥४॥

६[क] तं त्वा यं देवा अंशुमाप्याय(य)न्ति
तं त्वा यमादित्या अंशुमाप्याय(य)न्ति ।
६[ख] तं त्वा यमक्षितमक्षितये पिबन्ति
स नः सोमः प्र तिरद् दीर्घमायुः ॥५॥

अन्येषां प्राणेना प्यायस्व मास्माकं प्राणेन ।
५[कख] योस्मान् द्वेष्टि यं वयं द्विष्मस्तस्य प्राणेना प्यायस्व ॥६॥

---

२ का. अनाभिरस्मि नहितवे. . . दिव विश्वतः । आर्वानिर्ऋते;
क उ. अनाभुरश्मि. . . ;
३ का. . . . . रमितिरसि । सँ स्वतेन राधृषेय मां * विरादृषी ।
क मा. . . . रसि ॥
ख उ. * श्रितेन * * श्रितेन * * ॥
४ का. * दर्शितासि * सन्दृष्टः।
ग का, मा. * सि * सि ॥
५ का. तन्त्वायन्दावा अँश. . यन्द तन्त्वा महत्तमक्षतये . . प्रतदीर्घ . .;
क मा. * * वयं * . . . ;
घ उ. * * सोम ॥ ज, म. . . . तिरदीर्घ. . . ॥
६ का. * प्राणैना मास्मकं प्राणेनां * * यं च वयन्. . . ;
ख मा. स्माकं प्राणेन ॥
गघ मा. योस्मा (ज, म. स्मां) . . . दिष्मस्तस्य. . प्यायस्वस्माकं प्राणेन॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कख तै.स. ४.७.१३.१ मै. ४.९.११, तै ब्रा. ३.१०.४.२३; तै. आ. ४.११.६ चिदसि समुद्रयोनिः श्येन ऋतावान् ।
सोमपीथोप न एह्यर्वाङ् रायस्पोषेण प्रजया धनेन ॥७॥

स्वरव स्थ नमो वो महतामूर्जायै ।
पर्णां माव गाम् ॥८॥

शौ. १९.५५.५ अपश्चाद्* *दघ्वान्नस्य (<दघ्वान्नश्च?) भूयासम् ।
अन्नादायान्नपतये रुद्राय नमो अग्नये ॥९॥

या ते वसो वात इषुः सा त एषा ।
तया नो मृड ॥१०॥

---

७ का. तिरसि . . . योनश्शेद्व ऋतावाम् सोमपीतोमत्यह्यर्वाङ्न्दं क्षेत्रित्रियं रपः आ मा गश्छन्ढ व्रह्मचारि (→ चरि) णा प्रात एवे वरारदा । प्रजापतिष् परमेष्ठीन्नारदो नाम वासि वृहस्पतिष् प्रजापतिरारदो व्रह्मचारिणः;
द्र. प्रजापतिष् इत्यतः सस्वरपाठः ।

८ क मा. स्मरवस्थ. . . ; ग मा. पर्ण्णा * * ॥
द्र. का. नास्ति ।

९ का. आपश्चाद्या ×× सो अग्नये। क मा. अपश्चा (=उ.) वघ्यान्नस्य (ज,ना. द्यघ्यान्नस्य, म. ह्यघ्यान्नस्य); शौ. अपश्चा दुग्धान्नस्य (दग्ध्वान्नस्य, दग्ध्वान्तस्य अपि)* । मै. ३.९.४ अपश्चाद् दुघ्वान्नं *।

१० का. . * * * वातेषुस्यात एषः * नो मृळ z१z

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.४४

तु.पै.१२.१.१ अग्निस्तक्मानमप बाधतामितो वरुणो ग्रावा मरुतः
पूतदक्षाः ।
वर्हिषदः समिधः शोशुचानास्तक्मनः शोचां अप
निर्नुदन्तु ॥१॥

पै.२०.९.४ द्र. यो अभ्यवभृणायसि स्वपन्तमिछ (<मत्सि?) पुरुषं
जै.उ.ब्रा.४.१.२-६द्र.शयानमकोविदम् ।
कौ ४६.५५द्र. स नः सहस्रवीर्यानुष्ठाता शिवो भव ॥२॥

देवयातुरसि मृडोसि। मृडास्माकं द्विपदे चतुष्पदे
मा तस्य मीमृडो द्विपदे चतुष्पदे यो अस्मान् द्वेष्टि यं वयं
द्विष्मः ॥३॥

२०.४४.१ का. अग्निस्तवतानमवा. . . * ग्राव मारुतः . . दक्षा तेर्भिषदस् * सं
शिशानास्तन्मनश्शँमाम्यभिनिन्नुदन्तु।
ख मा. . . . दक्षा । घ मा. स्तक्मांनः * * र्निर्नुदत्तु ॥
२ क-ग का. * त्यबभृणायसि. . . श्छरुषं. . . ।
ख म. स्वपंतमिछ * । मा, ज. स्वपन्तमि (ज.सि) छ * ;
ग मा. . . . दिवं ।
द्र. क <अव√भृ; भृणाय इति ऐकपदिकः।
७ममन्त्रे अवभरणो नामासि। तु. हृणाय-, हृणीय-।
रनु १९५२ : §३६०/पृ. ३०२ अपि द्र.। भृ-इत्यस्य प्रभावात्
का. अब इत्यत्र स्पर्शवर्णः। ततः बभृ-इति प्रमादः। कौ. सूत्र,
जै.उ.ब्रा. अपि तथा। ख अत्सि इति कौ.सू.पाठः। यद्वृत्तवाक्ये
लोटः असङ्गतत्वात् अस्य पाठस्यापि योग्यत्वं ध्येयम्।
३ का. . . . तुरसि । मृळास्माकं * * वा तस्यै मृळो * * । स्मान् * *
चवयन् * ;
कख मा. . . . मृडोसि ॥ . . . दिपदे चतुष्प;
ग मा. "मीमृडो" नास्ति ।
घ मा. * स्मा. . . ॥ ज, म. * अस्मां . . . ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मयातुरसि मृडोसि । मृडास्माकं . . . द्विष्मः । ।४।।
अन्नयातुरसि मृडोसि । . . . द्विष्मः ।।५।।

मनुष्ययातुरसि मृडोसि ।
मृडास्माकं द्विपदे चतुष्पदे मा तस्य मीमृडो द्विपदे चतुष्पदे
यो अस्मान् द्वेष्टि यं वयं द्विष्मः ।।६।।

अवभरणो नामासि देवत्रा णो अक्षमापः ।
यो अस्मां द्वेष्टि यं वयं द्विष्मस्तन्त[1] आसन्नपि दघ्मः।।७।।

यददोस्नाता* आसुरोदीक्षितोचरत् ।
तस्य यन्मलमवास्रवत् स हि नासि तावदनुष्ठ्या*
त्वा विद्मारसं वृश्चिक ते विषम् ।।८।।

४-५ का. अन्नुयातुरसि । ब्रह्मयातुरसि । मा, म. मृडोसि इत्यत ऊर्ध्वम् । ज. – रसि इत्यतः ।
६ का. परेत्ययातुरसि । मृळोसि मृळास्माकं * * । वा तस्यै मृळो * * । * स्मान् * यं च वयन्द्विष्मः;
क मा. मन्नुस्य. . . ।
ग मा. * * मृडो * ; चतुष्पदे इति नास्ति ।
घ मा. * स्माद्द्वेष्टि * * दिस्मष्मः ।। ज, म. * अस्मां. . . ।
७ का. अर्वाङ्कृतिनामासि । देव × × नामसि दध्मा;
ख-घ मा. . . . देवत्रासो. . . । * अस्माद्द्वेष्टि * * द्विष्मस्तत्रआसंनपि;
घ म. स्तन आर्सं नपि * ।। ज, ना. स्तत . . .।।
८ का. या क्षेम्ना नामिरो दीक्षतो चरत् तस्येदं बलमासृज सेनासखायि दृषृष्ट्यः आत्माविद् सरसं वृश्चिक * * ; क उ. . . दोस्नाना . . .; द्र. यदसावितीष्टम्।
ख मा. . . . चरन्त । ग उ. * . . . ळमवाश्रवत्; उ. . . दनुष्ट्या-;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

केतुलङ्गा नाम ते माता कर्कटः पिता ।
तत् सत्यमरसमभग ते विषम् ॥९॥

द्वे विषस्य धारे स्त्रिया अन्या पुंसो अन्या ।
ते उभे अरसे ॥१०॥

२०.४५

विश्वविन् तं नष्टमनु पश्यसि ।
अदो मे नष्टं तन्मे पुनर्देहि ॥१॥

विश्वकर्मन् तत्* त्वमुप गच्छसि ।
अदो मे नष्टं तन्मे पुनर्देहि ॥२॥

विश्वव्यचस्तत् त्वय्यध्याहितम् ।
अदो मे नष्टं तन्मे पुनर्देहि ॥३॥

पै.२०.३७.९द्र परि पूषा पुरस्ताद्धस्तं दधातु दक्षिणम् ।
शौ.७.९.४
क-ग ऋ.६.५४.१० पुनर्नो नष्टमायति जीवेन भुनजामहै ॥४॥

---

९ का. काभु (→तु) र्गा नमि * * * * तन्मन्यासभक्त सरसं विषम्;
क मा. केतुळंगा. . . कर्कट * । * सत्यमभग * * ॥
घ ज. . . . विर्षं । द्र. एको दण्डः । म. . . विर्षं ॥
१० का. द्व * धारये * न्या * न्यगती उभा समे z२z
२०.४५.१ का. विश्वेयिद्यं नष्टमर्व. . . र्धेहि ।
२ का. * तत्व. . . । अधो. . . पुनर्धेह ।
क मा. विश्वकर्मं त;
उ. . . त त्वमपगछति ॥ द्र. इतः परमूह्यम् ।
३ काश्मीरीये अयं नास्ति । क उ. . . . स्त;
४ का. * प्रषा. . . द्धास्तं * दक्षिणाम् । सगलिग पूषालिग पुनर्गो नष्टमाकृधि । जीवेनभिनुजावहै । ग ऋ. . . माजंतु ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रस्त्वाभ्यैत् सर्पत् तत्* त्वा गोष्ठ आदधात् ।
गघ शौ.२.३.३　तदास्रावस्य+ भेषजं तदु रोगमनीनशत् ॥५॥

तु.काठ १.५　विष्णोर्मनसा पूते स्थ(:)। देवो वां सवितोत् पुनातु ॥६॥

तु.कौ.२.३२-३४　विष्णोर्मनसा पूतमसि देवस्त्वा सवितोत् पुनातु ।
मा. सं १.३　+अच्छिद्रेण पवित्रेण सहस्रधारेण सुप्वा+ ॥७॥

शौ.४.३९.१०　हृदा पूतं मनसा जातवेदो विश्वानि देवो वयुनानि विद्वान्।
सप्तास्यानि तव यान्यग्ने तेभ्यो जुहोमि स जुषस्व
हव्यम् ॥८॥

पै.१२.१८.१　अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ।
शौ.४.३९.९　तस्मै जुहोमि हविषा घृतेन मा देवानां यूयवद्
भागधेयम् ॥९॥

५　का. इन्दस्त्वाभीस्सर्पतु त्वा ग्रोष्ठा ततः नच स्रावस्य * रुद्रोग. . . ।
कख　मा, म. . सर्पत्त. . ; ज. . . सर्पत्तं. . . ; मा. . . . गोष्ठीं *। म, ज,
ना. . . गोष्ठी * ।
ग　उ. तदाश्रावस्य *;
६　का. नास्ति ।
७　का. . . न्मनसा पूतसि देवस्य. . . सुषुवा ।
घ　उ. * सुप्लवा ॥
८　का. . . . जातवेदा विश्वनि. . . । सस. . . ।
घ　उ. स इति नास्ति ।
९　का, उ. अग्नावग्निरित्येका ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्ते केशाँ अवाचीनान् क्रिमिर्वृहति मूर्धतः ।
प्राणं तस्योप दाश(<स)याद् वीरुत् खनति भेषजी ॥१०॥

ग-च तु.तै.आ.७.४.३ वेद वै ते भग(व)न्नाम भूरिर्नामासि रयिर्नाम ।
तं त्वा भग विशामि स मा भग प्र विश ॥
तस्मिन् सहस्रकाण्डेन मृजे भग त्वयि ॥ ११॥

२०.४६

आ मा †गच्छन्तु ब्रह्मचारिणः स्वाहा ॥१॥
चराणि स्वाहा ॥२॥
वि राजानि स्वाहा ॥३॥
असानि भद्रेभ्यः श्रेयान् स्वाहा ॥४॥
यशस्वी जनुतामनु चराणि स्वाहा ॥५॥
देवानां मा मनुष्याणां पशूनां ब्रह्मचारिणाम् ॥६॥

---

१० का. . . . केशां. . . चीनां कृमि. . . दाशया वीरुद्वष् * * ।
खग मा. क्रिर्मिवृहतिम्नुर्द्वतः । . . . दाशाया; ज. . . . दास → शयाद्;
द्र. घ अन्वयः? वीरुत् भेषजी, (तां) खनति? 'वीरुधः खनति भेषजीः' इति बेरेट्। कर्ता तु अध्याहार्यः।
११ का. . . . भङ्गनामो ह्वन्नामासि रयिन्नाम । तन्त्वा भगष् * * । . . . विशः अस्मिन् . . . मृचे * त्वौ zzz३z
ख मा. . . . रयिर्न्नाम। द्र. कख बार्हतौ पादौ।
ङ मा, ज. मृजेन (ज. कृ → न) * * ॥४५॥ऋ११॥
काण्डिकान्ते म. ४५ ॥ ऋ१०॥
२०.४६.१ का. . . . रिणो गमयस् * ।
द्र. ज सर्वत्र मन्त्रान्ते १ इति अचतुष्पादत्वसूचकम् ।
३-५ का नोपलभ्यन्ते ।
४ मा. अस्यनि * श्रेयान * ॥ म. . . . श्रेयानि * ॥
५ मा. * मनु * * ॥
६ का. * * * पितॄणां; मा. * म्य * ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रियं प्रजापतेः कृणु स्वाहा ॥७॥

हा अम्ब पनेचरि ॥८॥

अयं मे हस्तो अक्षितो रुदति तमु मे अगदं कृधि ॥९॥

त्वं क्षितस्य भेषज्युभयोरक्षितस्य च ॥१०॥

उदेलड़ि ॥११॥

असुरसि स्वाहा ॥१२॥

क्रतुरसि स्वाहा ॥१३॥

२०.४७

पुरुषोसि स्वाहा ॥१॥

विजातिरसि स्वाहा ॥२॥

प्रजातिरसि स्वाहा ॥३॥

---

७ का. * प्रजापते प्रियङ्कुणु * । म. * प्रजापते * ॥
८ का. हां ववृनवरि । मा. . . . पनेचरी ।
९ का. * * * अक्षतो रुदितितत्मे अदँ * ।
मा. अय * हस्त्ये * रुदन्ति * * अपदं * ।
१० का. . . . भेशज्यु भयोक्वृश्चिकस्य च ।
मा. * * भेषय्या. . ॥
ज, म. * क्षतस्य भेषज्य (←ज्या ज.). . . ॥[१]
११ का. उदीलरी । मा. उदेलड़िं ।
१२ का. असु. . . ।
काण्डिकान्ते का. z४z मा. ॥ऋ॥४६॥ ज.॥४६॥
ऋ १३॥ म.॥४५॥ऋ॥
२०.४७.१ मा. मन्त्रोऽयं नास्ति ।
२ का. विजाभरसि * ॥ द्र. म, ज. मन्त्रान्ते ॥ श्रीः ॥
३ मा, ज. प्रजापति. . . ।१। मा. अयं प्रथमो मन्त्रः ॥
३-५ का. नोपलभ्यन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वजातिरसि स्वाहा ॥४॥

स्वजातिर्नामासि स्वाहा ॥५॥

वेद वै ते नारद नाम वाग् नामासि
तस्य ते यशो भक्षीय ॥६॥

वेद वै ते सनात् कुमार नाम चक्षुर्नामासि
तस्य ते मधु भक्षीय ॥७॥

२०.४८

स्नुषासौ सेनास्याः सेनाया
इहास्याः श्वशुरोयमस्याः श्वशुरः ।
सा यथा स्नुषा श्वशुरादधस्पद्यते
अधरा पद्यते नीची पद्यते ॥१॥

---

४ मा स्वयातिरसि ॥ अयं तृतीयो मन्त्रः ।
५ मा. स्वयातिनामासि * ॥
६ का * * * नादन नारदवां नामासि तस्यास्ते * * ॥
ख मा. ग्रावाम्यसि ॥ * * यश्ये रुक्षीय ।
७ का. * * * अशनात् कुमारवाँ नामवाँ नामासि. . . z५z
क मा. * * * सनत् * * ;
२०.४८.१ द्र. काण्डिकेयं काश्मीरीये ग्रन्थे पतितां ।
१ क मा. स्नुष्यस्यै. . . ;
ख उ. . . . श्व(ज. स्व)सुरः ।
ग मा. * * स्नुष्य. . श्वसुरा(=उ) . . .;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवासौ सेनास्याः सेनाया
अधस्पद्यतामधरा पद्यतां नीची पद्यताम् ।
सेन्द्राग्निभ्यां हतवीरां हतपूरुषां पराजितां
प्रणुत्तैतु परमां परावतम्* ॥२॥

तामिन्द्राग्नी हतवीरां हतपूरुषां पराजितां
प्रणुत्तां यतीमन्वा*क्शीताम् ।
पराजित एत्वसावामुष्यायणो अमुष्याः पुत्रः ॥३॥

अस्ना व्यक्त एतु ।
अघं हि रण्येत्वसावामुष्यायणो अमुष्याः पुत्रः ॥४॥

अघप्रतीको अघेनैनं विध्यामः ।
अभूत्या एनं पाशे सित्वा दुःस्वप्न्येन संसृज्य मृत्यो-
र्व्यात्त आसन्नपि दधामि ॥५॥/

---

२ ख मा. . . . स्पद्यतांमधरा * ;
२घ ३क मा. . . . हतर्वरा; २ङ ३ख मा, म. हतपुरुषां * ;
२च मा. प्रणुतैतु * * ।
द्र. स्व परा जितम् । इदं नृनीममन्त्रेण अन्वितम् ?
३ ग मा, ना, कु , . . मनुवाक्शीतां। म, ज. ला . . . मनुवाकशीतां . . .;
द्र. ग अन्वा√क्शा - मै.सं.१.९.८ - तैरे॒व जु॑हुयात् समृतय॒ज्ञे च॒तुर्भिश् चतुर्भिरन्वा॒क्शायं पुरस्ता॒त् प्रातरनुवा॒कस्य। इतियत्तदन्वाख्यातेः, साम्प्रदायिकप्रमादाद्वर्णविकारः। AiG I:209 द्र। मन्मते त्वत्र शिशातिरर्थः। विकरणव्यत्ययेन क्शाति, क्शीत इत्यादि रूपम्। प्र/द्विव. अक्शीताम्। शास्तिर्वार्थः।
४ मा. अम्ना . . .। . . . ष्यायणे * *।। ख द्र. <अघं हि रण्य(<ण्ये) एत्वसा . . .। अत्र हि निश्चयार्थे। तु. ऋ १.८०.१ इ॒त्था हि सोम॒ इन्मदे॑ ।
५ ख म. * ऽ घेनैकं * । मा. . . विद्धामः ;
घ मा. दुःस्वप्ने * . . . ; म. द्वष्वप्न्येन * . . . ;
ङ मा. -व्यात्त, . . ; म, मा. . . . आसंनपि * ॥४८ ॥ऋ ५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०.४९

सृजाम्याप उशतीरुपेमा:+ संरराणाः पयसा सं बभूवुः ।
दत्तो अस्मभ्यं द्रविणेह भद्रा
अपां प्रति प्रति गृह्णात्वेनाः ॥१॥

शो.६.१४२.१ उच्छ्रयस्व* बहुर्भव स्वेन महसा यव ।
पृणीहि सर्वा पात्राणि मा त्वा दिव्याशनिर्वधीत् ॥२॥

२ आश्रृण्वन्तं यवं देवं यत्र त्वाच्छा+वदामसि ।
तदुच्छ्रयस्व* द्यौरिव समुद्र इवैध्यक्षितः ॥३॥

३ अक्षितास्त उपसदो अक्षिताः सन्तु राशयः ।
पृणन्तो+ अक्षिताः सन्त्वत्तारः सन्त्वक्षिताः ॥४॥

सकृद् यद् द्यौरजायत सकृद् भूमिरजायत ।
सकृद् यः पृश्निया(=पृश्न्या)दुग्धं तदन्यो नानु जायते
मा त्वानु जनि कश्चन ॥५॥

इष्वग्रमिषुयावनं मणिं कृण्वे सुमङ्गलम् ।
स मा शरव्याभ्यः पातु दिवा नक्तं च जीवसे ॥६॥

२०.४८.१ का. . . . रुपैमाँ । इतः परं नास्ति । एवम् अष्टमं यावत् ।
क मा. . . . उषतीरुसेमा:; ज म. . . । रुषेमा:;
ग मा. * असृभ्य * * ;
२ क उ. उत्स्रयस्व. . . ; ग म. गृणीहि. . . ; घ मा. . . . र्वधात् ।
३ ख म. यन्न. . . । ग उ. तदुत्स्र (मा. त्सृ) यस्व. . . ;
४ ख मा. * * रराशयः ।
गघ उ. प्रणन्तो * संत्वत्तारः (म. स्यंत्वत्तराः) संत्व. . . ॥
५ क मा. सकृवद्धौरजायत; ग म. * य * * ; मा. * * पृश्नीया * ;
ग द्र. पृश्नियाः = पृश्न्याः। क्षैप्रव्यवायः।
६ क मा. इक्ष्युग्रमिषु. . . ; म. . . . जावनं;
ख म. * * पुमङ्गलं । घ मा. विवा * * * ॥ ज. . . . त्तञ्च * ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिष्ठितोसि ब्रह्मणा जम्मयामसि त्वा वयम् ।
अपामार्गेण विद्वला इदं त्वाप मृज्महे
युवन्तं क्षिव(<क्षिप)न्तं जहि ॥७॥

